गङ्गालहरीव्याख्या

४७ पत्र

लो॰ गं॰ वत्ता ११

स्वा

गं.ल.
१

॥श्रीगणेशायनमः॥ श्रीगुरुभ्योनमः। श्रीरामगोविंदतीर्थपादकृपाविशेषादुपलब्धबोधः॥ श्रीवासुदेवादधिगतसर्वशास्त्रः॥ शिवकुंकिमपिस्पृहा
नः॥१॥ इहखलुसंसारपंकमग्नानांप्राणिनांसमुद्धारायगंगास्तुतिप्रसंगेनपरंब्रह्माद्वैतंनिर्द्धारयितुमाह सद्वैकेति भोसुरधुनि त्वत्कीर्त्यैः मोमनःस्पृ
हयतिपतः सद्वैकेत्यादिस्वरूपात्वमेवसती चासौएकाचसद्वैकासती कालत्रयाबाध्याएकासजातीयद्वितीयरहितातथानिर्द्वैताद्वयनिखिल
मोहौपुयाद्वयंकार्यमोहोमायाः विद्याभेदेनद्विधाप्रकृतिः तथाःमृतसुखामोक्षसुखरूपातथासमस्तव्यस्त समष्टिव्यष्टिरूपआत्मास्वरू
पंयस्याईदृशाः स्थिरचरविकल्पः स्थिरचरौआत्मानौयस्यसस्थिरचरात्मकस्तादृशोविकल्पःमध्यपदलोपीसमासः तस्यएकाचासौनिल
याचमुख्याधिष्टनिरूपानिरीहानिर्व्यापारनिर्लेपाअसंगानिरवधिपरब्रह्मैवसुष्ठुभगोमहात्म्यंयस्याः भगंश्रीकाममहात्म्यवीर्ययत्नार्क

॥श्रीगंगायैनमः॥ सद्वैकानिर्द्वैतद्वयनिखिलमोहाऽमृतसुखासमस्तव्यस्तात्मस्थिरचरविकल्पैकनिलया॥ निरीहानिर्लेपानिरवधि
कीर्तिषुस्मृतः॥ सदेवसोम्येदमग्रआसीत् एकमेवाद्वितीयं सलिलएकोद्रष्टाअद्वैतः सत्यं ॥परब्रह्मैवंत्वमेवकीर्त्यैःसुरधुनिमनोमेस्पृहयति॥१॥ सुभगे
ज्ञानमनंतं विज्ञानमानंदंब्रह्म एतद्वैतदक्षरं नतस्यकार्यंकारणंचविद्यते अविकल्पोऽयमात्मेत्यादिप्रमाणात्सद्वैकेत्यादिस्वरूपेयद्ब्र
ह्मतदभिन्नैवगंगासर्वेश्वरस्ययाशान्तामूर्त्तिरेषासनातनी॥ त्रैलोक्यपावनार्थायदधर्याधरणीगतेत्यादिवाक्यैरितिभावः॥ नचद्वैतप्रतिभासस्यभ्रांति ॥१॥
त्वात्तनचबाधंविनाद्वैतप्रतिभासस्यकथंभ्रमत्वंसर्वेषांप्रमाणानामज्ञातज्ञापकत्वेनैवप्रामाण्यात्ज्जडेचप्रमाणप्रयोजनयोरभावेनाज्ञानानभ्यु
पगमात्तत्रप्रमाणव्यापाराभावादज्ञातसन्मात्रविषयत्वादितिविवक्षितविवेकेनद्वैतस्यप्रमाणायोग्यत्वादित्यधिकमाकरे॥ ॥इत्यद्वैतप्रकरणं॥१॥

अशेषेरिति॥ भो मुरधुनि त्वं स्तुता ध्याता ख्याता सती पुमर्थान्वितरसीत्यन्वयः कीदृशी त्वं अशेषैर्दोषै रागादिभिर्गुणैः प्रकृत्यादिभिर्विरहिता
अविशेषाऽसामान्यासामान्यविशेषधर्मैर्रहिता परममहिमानं अखण्डानंदाद्वितीयलक्षणं महात्म्यं प्राप्नवती तथा अशेषाघैः रागादिमूल
कारणैः मम स्तपापैर्हीना अत एव निखिलनिजजनानां स्वभक्तानां संतापस्य हरणी इत्यर्थः॥ अयं भावः॥ यद्यपि यः सर्वज्ञ इत्यादिवाक्यात्का
रणत्वादिलिंगकानुमानाच्च ब्रह्म सविशेषं वक्तुं शक्यं तथापि एष सर्वेश्वर एषोन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां त्रयमप्येत
त्सुप्तं मायामात्रं अथ च तुर्यं च तुरात्मा तुरीयावसितत्वादेकैकस्योताऽनुज्ञात्रनुज्ञाऽविकल्पैस्त्रयमत्रापि सुषुप्तं स्वप्नं मायामात्रं एकधैवानु

अशेषैर्दोषैस्त्वं जननि गुणजातैश्च रहिताऽविशेषाऽसामान्या परममहिमानं गतवती॥
समस्ताघैर्हीना निखिलनिजसंतापहरणी स्तुता ध्याता ख्याता वितरसि पुमर्थान्सुरधुनि ॥२॥

इत्यं नेह नानास्ति किंचिन चिदेकरसो ह्ययमात्मा साक्षी चेताः केवलो निर्गुणश्चेत्यादिवाक्यैर्ब्रह्मणोऽशेषविशेषप्रतिषेधान्निर्वि
शेषमेव ब्रह्म न च यः सर्वज्ञ इत्यादिवाक्यविरोधः तेषां निर्गुणवाक्येन सगुणत्वनिषेधार्थमनुवादत्वात् न च सगुणवाक्येन निर्गुणत्वमे
व निषेद्धुं निर्गुणवाक्येनानूद्यत इति वाच्यम् तात्पर्यपर्यालोचनपक्षे प्रसक्तस्य निषेधार्थमनुवादयोगात् तथा च तदभिन्ना गंगापि ताद्
रूप्येवेति स्तुता ध्याता ख्याताऽखिलपुमर्थदानसमर्था ब्रह्मसंपत्तिरूपमोक्षस्य निर्विशेषब्रह्मप्रतिपत्तित एव संभवादिति भावः॥
॥इति निर्विशेषप्रकरणम्॥ २॥

गं. ल.
२

समुत्पन्नमिति॥ भो गंगे त्वं समुत्पन्नस्याद्यादिषड्विकारान् जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते विनश्यतीत्याद्युक्तान्नैव भ्रमयसि यतः सच्चित्सुखघनापच्चोत्पत्त्यादिकरोषितज्जनाज्ञानात्तज्जीवाश्रिताज्ञानादित्यर्थः अयंभावः यद्यपिब्रह्मपरिणामि उपादानकारणत्वात्मृदादिवत्तन्निरंतरात्वेपि परिणामांतरलाभस्तु शक्तयः सर्वभावानामचिंत्यज्ञानगोचराः यतोऽतो ब्रह्मणस्तास्तु सर्गाद्याभावशक्तयः इत्यादिस्मृत्याऽनंतशक्तिमत्वात्परिणामित्वेपि नित्यत्वं तु परिणामनिर्वचनेन तथाहि परिणामः कारणद्रव्यस्य संस्थानविशेषो नतुद्रव्यनाशेनद्रव्यांतरोत्पत्तिरिति युक्तिभिः परिणामित्वं वक्तुं शक्यं तथापि निष्कलं निष्क्रियं शांतं न जायते म्रियते वेत्यादिश्रुति

समुत्पत्तिं गंगे परिणतिपथं वृद्धिमपिवा विहीनत्वोच्छित्तीभवनमपि भावस्य विकृतीः॥
कदाचिन्नैवत्वं भ्रमयसि खलु सच्चित्सुखघना जगज्ज्ञानान्मातः प्रकटयसि पास्यस्मि सकलं॥३॥

2

भिर्ब्रह्मणः विकृयत्वावगमात्घटादिवद्घटादिभावस्याऽदृष्टपूर्वत्वेन वा स्वस्वदृष्टत्वादुपपन्नेश्चाथस्थानुरथयोगान्पथः सृजत इत्युक्तस्वाप्नसृष्टिंमतीव विवर्त्तित्वमेव न परिणामित्वं न च तर्हि पदद्वयमालित्यादि सर्वात्मत्वश्रुतिविरोधः परिणाममंतरेण कारणस्य कार्यात्मताप्रादुर्वचत्वादिति शंक्यमृतासां निष्प्रपंचब्रह्मप्रतिपत्तिप्रयोजनत्वात् विधिमुखेन प्रतिपादयितुमसमर्थानां प्रपंचात्मतामारोप्यतत्साक्षित्वेन तं प्रतिषेधेनाद्वितीयबोधनादित्यास्तां विस्तारः॥३॥ इति परिणामनिरासप्रकरणम्॥ ॥ ॥

२

सवित्राद्या इति॥भोस्सुरधुनिसवित्राद्याः सूर्याद्याः त्वत्तोब्रह्मरूपायाः विभांतितेसूर्यादयः संभांतीप्रकाशमानांत्वांविभातुंभासयितुंनशक्ताः तत्तेजसंतर्भा
वेनार्थः अतः शर्मनिवहां आनंदसंदोहां सर्वज्ञांत्वांजनताजनसमूहः श्रयतिभजतित्वंस्मृतापिजनसमूहायस्थिरपदंमोक्षपदं ददासीत्यर्थः
॥अयंभावः यद्यपिब्रह्मज्ञानस्वरूपंज्ञानवृद्धेतिविकल्पेकिमपिननिरूपयितुंशक्यंतथाहियदिज्ञानस्वरूपंतदासर्वज्ञत्वहानिः ज्ञातृज्ञा
नोभयरूपानभ्युपगमात्यदिज्ञानवत्तर्हिस्वरूपव्यतिरिक्तस्यजन्यत्वात्तज्ज्ञानस्यजन्यतयाऽस्मदादिवत्संसारित्वप्रसंगः जन्यज्ञाना

सवित्राद्यास्त्वत्तेजः सुरधुनिविभांतिस्फुटतरंनतेत्वांसंभांतीक्वचिदपिविभातुंहिविभवः॥
अतस्त्वांसर्वज्ञांश्रयतिजनताशर्मनिवहांददासित्वंस्मृत्याप्यहहननुतस्यैध्रुवपदम्॥४॥

श्रयस्यैवसंसारित्वात्तथापिविज्ञानमानन्दंब्रह्मेतिश्रुत्याब्रह्मणोज्ञानरूपत्वमेवयः सर्वज्ञइतिश्रुत्युक्तसर्वज्ञत्वंतुसमस्तज्ञेयानु
गतमायाप्रतिबिंबितसोपाधिकस्फुरणाश्रयत्वादुपपद्यतइतिवक्तुंशक्यंतमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिश्रुतेरत
एवनास्मदादितुल्यतातथाचमोक्षमपिस्वभक्तस्यसएवददातिब्रह्मरातिर्दातुः परायणंतिष्ठमानस्यतद्विदइतिश्रुतेः॥गंगायास्तुताद्दग्
ब्रह्माभिन्नत्वान्नाद्दशीतिप्रागुक्तएवमग्रेपि॥ ॥इतिसर्वज्ञताप्रकरणम्॥ ४॥

गं॰ ल॰
३

सृजसीति॥ भोगंगे त्वमेका गुणतः सत्वाद्यैः सृजसि रक्षसि संहरसि किंचांतर्यामिरूपा यमयसि प्रेरयसि न केवलं त्वं निमित्तमात्रं किंतूपादानमपी त्याह निमित्तोपादानमिति अतस्त्वं कार्यकारणात्मिकेत्याह स्थविष्टा सूक्ष्मेति॥ अतो वयं मोक्षदातुं त्रिपथगां अत्रभवंती पूज्यां अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थे निपातौ भजामः स्त्यन्वयः॥ अयंभावः यद्यपि कार्यद्रव्यस्य घटादेर्भिन्नोपादानाधिष्ठातृकत्वदर्शनान्निमित्तत्वस्य समवायिकारणभेदगर्भतया समवाय्यवृत्तित्वाच्च ब्रह्मनोभयविधकारणं किंतु निमित्तमेव चेतनत्वादित्रिव कुंत्राक्यं तथापि आत्मा वा इदमेक

सृजस्येका नित्या जगदिदमवस्यस्त्रिगुणतः स्थविष्ठा त्वं सूक्ष्मा यमयसि जगज्जातमनिशम्॥
निमित्तोपादानं त्वमसि जगतामत्रभवतीं भजामस्त्वां गंगे स्मृतमिह वितर्त्तुं त्रिपथगाम्॥५॥ ॥

एवाग्र आसीत तदैक्षत तत्स्वयमाकुरुत मासीत् सच्च त्यच्चाभवत् यतो वा इमानि भूतानि जायंते येन जातानि जीवंति स कारणं निनिखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः इत्यादिश्रुत्या जगतश्चेतनकारण सामानाधिकरण्य चेतनाधिष्ठितत्वयोरवगमात्स्य दिवब्रह्माखिलजगन्निमित्तोपादानम् उपादानत्वेपि निमित्तत्वस्य कारणताभेदगर्भतया समावेशादिति संक्षेपः॥ ॥ इति जगन्निमित्तोपादानताप्रकरणम्॥५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

३

जगदिति॥ भो सुरधुनि केचित्सांख्याः अदः इदं जगत् मुग्धं मोहान्वितं तथा सुखितं दुःखितं दृष्ट्वा तत्कारणं अचितं जडं प्रधानं सगुणं मोहा
दिहेतुसत्त्वादित्रिगुणात्मकं प्रमन्यंते कल्पयंति त्वं पुनः सत्त्वादिगुणैर्विरहिता तत्कर्मैस्तैरेव गुणैः सृजसीत्यहो आश्चर्यं अतः स्वयं रक्षांकर्त्तुं विहर्त्तुं
च प्रभवसि समर्थासीत्यर्थः अयं भावः यद्यप्यजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपा इत्यादिश्रुत्या जगति परिदृश्यमानसु
खदुःखमोहान्वितत्वलिंगकसमानगुणहेतुत्वानुमानेन च सत्त्वादिगुणकप्रधानस्यैव जगत्कारणत्वं वक्तुं शक्यं तथापि क्षरं प्रधानममृ

जगद्दृष्ट्वा मुग्धं सुखितमथ दुःखान्वितमदः प्रमन्यंते केचित्त्रिगुणमचितं कारणमिह॥
अहो त्वं तत्कर्मैः सृजसि गुणजातैर्विरहिता स्वयं पातुं हर्त्तुं प्रभवसि विहर्त्तुं सुरधुनि॥ ६॥

ताक्षरं हरः क्षरात्मानावीशते देव एकः प्रधानक्षेत्रज्ञपतिर्गुणेश इत्यादिश्रुत्यंतरानुसारेण तस्याः परमेश्वराधीनमूलप्रकृतिपरत्वात्सु
खादेरंतरस्तया जगति हेतोरसिद्धेश्च न वक्तुं युक्तं तथा च न सांख्यमतसिद्धिरिति भावः॥ ॥इति प्रधानवादनिरसनप्रकरणम्॥ ६॥
परइति॥ भोज॥ न नियेषां श्रुतिः कर्णपथं न प्राप्ता अतस्ते तर्कद्वारेणाः परे नैय्यायिकाः परमाणुद्व्यणुकतः परमाणोर्द्व्यणुकं ततस्त्र्य
णुकमित्यादिक्रमेण सृष्टिमाहुः त्वं पुनः अणुद्व्यणुकमुख ॥ ॥

गं. ल.
४

परमाएवादिक्रममुखं द्ध्येव त्रिजगतीकरोषि पासि प्रलयमार्गं प्रापयसीत्यहो आश्चर्यमित्यन्वयः यद्यपि धानारुहद्रवदेहक्षोजसेतिश्रो
तदृष्टांतेन कार्य्यस्य स्वन्यूनपरिमाणकसमानजातीयद्रव्यारभ्यत्वनियमेन चलोक दृष्टेन परमाणुवादो वक्तुं शक्यस्तथापि दीर्घ लोके
नतंतुनाद्विगुणीकृतेन ह्रस्व द्रव्यो तन्तेर्दृष्टत्वया न्यूनपरिमाणवदारभ्यत्वनियमे व्यभिचारात् श्रौतदृष्टांतस्य तु ब्रह्मणो दुर्ज्ञेय तद्रूप सूक्ष्म
त्वाभिप्राय त्वाद्वमायां तु मेकृतिं विद्यान्मायिनं तु महेश्वरं देवात्मशक्तिं स्वगुणै र्निगूढामित्यादिश्रुत्या ब्रह्माश्रितानिर्वचनीयानाद्यविद्या
याएव हेतुत्वावधारणाच्च परमाणुवादः प्रमाणादिकइति भावः॥ इति परमाणुवादनिरासप्रकरणम्॥७॥ विधिमिति· भोगंगे भवभीता

परे प्राहुः सृष्टिं जननि परमाणुद्व्यणुकतः श्रुतिर्येषां नास्ति प्रथमतस्तर्कचरणाः॥ अहो त्वं यत्काणुद्व्यणुकमुखमेतां
त्रिजगतीं करोषि त्वं पासि प्रलयपथमेनां गमयसि॥७॥ विधिं पहृच्छन्नावदति परमाम्नायनिवहः पदा स्पैसिद्धं च प्रवदति
सतद्दुस्तरमिह॥ समस्ताधिष्ठानं रहितपरिमाणं सुखभरं तदेव त्वं गंगे भवसि भवभीतान्निहरणि॥८॥ ॥श्री॥

न्निहरणी आम्नायनिवहः वेदसमूहः यहतयथा यदा स्पैपत्स्यास्ये विधिं प्रवर्त्तनां वदति तद्वत तथा रहितपरिमाणं अनंतं समस्ताधिष्ठानं परं परमात्मानं
सिद्धं सुखभरं आनंदकंदं वदति तदेव त्वमित्यन्वयः। अयं भावः यद्यपि वेदांतानां सिद्धार्थत्वे नदीतीरफलसत्तावाक्यवत्पौरुषेयत्वापत्तिः सिद्धवस्तु
बोधकवाक्यस्य प्रमाणांतरजधीपूर्वकत्वदर्शनादतः कार्यपरत्वमेव कार्यविषयतामंतरेण पुरुषार्थपर्यवसानाभावादिति वक्तुं शक्यं तथा
पि न तद्युक्तं सिद्धब्रह्मबोधादपि फलस्य श्रवणाद्वेदांतानां कार्यपरत्वे मानाभावात्तन्न च नदीतीरफलवाक्यवत्पौरुषेयत्वापत्तिः ब्रह्मात्मै

४

त्वमेवाभास्यं वेति॥ भो अंब मातः स्फुटविधिविधेयादिकपदैः लिङ्क्रियाकारकादिकपदैः अंत्रात्र यविशिष्टभावनाबोधकपदैरितियावत् त्व
मेवाभासि पक्षः येषु पदेषु हानादानादिभिः उह्यापावापादिभिर्लिंगैर्व्यवहृतिः व्युत्पत्तिग्रहो भवति अपि च प्रसन्नास्यैः प्रसन्नमुखत्वादिभिर्लिंगैः सि
द्धपदतः अक्रियार्थपदतो विदिता त्वमेवानन्दरूपा अनुभवपदवीं यासि प्रसन्नमुखत्वादिलिंगेन सिद्धार्थपदानां यत्र शक्तिग्रहः सापि त्वमे
वेतियावत्॥ प्रवृत्तिरिव मुखविकासादिलिंगैरपि व्युत्पत्तिग्रहस्य दृष्टत्वात् सर्वत्र प्रवर्तकानपेक्षणात् स्याद्वेदांतैर्ब्रह्मावगम इति भावः अयं नि
ष्कर्षः यद्यपि सिद्धस्याप्रतिपित्सितत्वाद् प्रतिपिपादयिषितत्वाच्च न तत्र वाक्यप्रयोगायोगात् वाक्यप्रयोगाविषये चत्रेदानां व्युत्पत्तिग्रहाल्लवे

त्वमेवाभास्यं वस्फुटविधिविधेयादिकपदैर्यतो हानादानादिभिरपि च लिंगैर्व्यवहृतिः॥
प्रसन्नास्ये लिंगैरपि च विदितासि द्धपदतस्त्वमेवानंदात्मान्नुभवपदवीं यासि नियतम् ९॥

दांतानां सिद्धब्रह्मपरत्वे प्रवृत्तिलिंगेन कार्यान्वितएव सर्वत्र पदानां शक्त्यवधारणादिति वक्तुं शक्यं तथापि गामानयेत्यादौ प्रवृत्तिलिंगेन कार्ये
बोधमिव भद्र पुत्रस्ते जात इत्यभिहितवति वार्त्ताहारे तेन सह समागतस्य पांथस्यापि स्मुखप्रसादादिना हर्षमनुमिन्वतो हर्षेण च हर्षहेतुबोधं
कल्पयतो बोधहेतुभूतवाक्यघटकपदानां बोधविषयकार्येऽग्राह्य एव सिद्धेऽपि शक्त्यवगमात् कार्यान्वितएव पदानां व्युत्पत्तिनियमस्याप्रमा
णिकत्वात् प्रवर्तकवाक्यस्येव सिद्धार्थवाक्यस्याप्यर्थवत्त्वाद्वेदांतानां ब्रह्मपरत्वमव्याहतमेवेति दिक्॥ ॥इति व्युत्पत्तिप्रकरणम्

॥९॥

गं॰ ल॰ ५

त्वमेवान्तरिति॥ भो आनन्दलहरि त्वमेवात्मरूपा मिरूपा अंतः हृदिस्थां तं अतः करणं यमयसि प्रेरयसि पुरुषवपुः राजगुर्वादिरूपा वहिर्देहादिकं यमयसि प्रवृत्तिजनक सर्वेष्टजनिकरणमतिरूपापि त्वमेव अतः नः अस्माकं स्वांते अंतःकरणं ... स्वरूपविषयं वर्ष्म शरीरं च स्व सान्निध्येः पूतं पवित्रं कुर्वित्यन्वयः॥ अयं भावः॥ अन्वयव्यतिरेकाभ्यां समीहितसाधनतात्मज्ञानस्यैव प्रवृत्तिहेतुत्वात्कार्यताज्ञानं प्रवर्त्तकं इष्टसाधनत्व्यतिरेकेण तस्यासंप्रतिपन्नत्वात् तथा च न वेदांतश्रवणादौ प्रवृत्त्यनुपपत्तिरिति॥ ॥ इति प्रवर्त्तकनिरूपणप्रकरणम् १० यथा संसृष्टार्थ इति॥ भो त्रिपथगे यथा लोक विषयैर्वचोभिः वाक्यैः संसृष्टार्थे इतरान्विते अथवा ऽभिहितमतगायां धिषणा भवति तथा हि निश्चयेन श्रुतिगिरा वेदरूपवचसा स्मृत्या स्मृतिमात्रेण जनताया जनसमूहस्य सकलपुरुषार्थस्य करणे समर्थायां त्वयि धिषणा भवतीत्यन्वयः॥ अयं भावः

त्वमेवांतः स्वांतं यमयसि वहिः पुरुषवपुर्मतिः सर्वेष्टानां जनिकरणमयं यं च भवती॥ अतस्त्वं भः स्वांते स्वपद विषयं वर्ष्म मम च स्वसान्निध्यैः पूतं कुरु करुणयानंदलहरि। १०। यथा संसृष्टार्थे भवति धिषणा लोकविषयैर्वचोभिस्तद्वद्वा ऽभिहितमतगायां श्रुतिगिरा॥ तथानन्दाख्यायां परं

यद्यपि अन्विताभिधानपक्षे तदादिपदानामितरान्वितप्रतियोगिकान्वय ... पुरुषार्थस्य करणे समर्थायां स्मृत्यात्वयि हि जनताया स्त्रिपथगे॥ ११॥ धियं प्रत्येव हेतुत्वान्नान्वितप्रज्ञानुभावकत्वं संभवति तथाभिहितान्वयवादेपि अनुभावकत्वरूपशक्तेर्लौकिके घेनभ्युपगमात् तेष्वपि तत्स्वीकारे तु मुख्यामुख्यविभागानुपपत्तिस्तथाप्यन्विताभिधानपक्षे ऽन्वितेत्यस्य स्वघटितवाक्यतात्पर्यविषयार्थकत्वात्तात्पर्यविषयस्यान्वितस्यापि वोधकत्वं मृष्यहंत एवमभिहितपक्षेपि शक्तिस्थले प्रकृतिप्रत्ययाभ्यां स्वार्थस्मृतिः स्मृताभ्यां ताभ्यां प्रकृत्यर्थान्वितप्रत्ययार्थवोधस्ताभ्यामेव चानुभवाभ्यां पदार्थयोः संसर्गावगमः लक्षणास्थले तु पदजन्यशक्यो पस्थितिप्रयोज्यलक्ष्योपस्थितेरेवानुभावकत्वं पदाजन्यत्वेपि शक्यवृत्तं तु पदप्रयोज्यत्वात् अवतार्किकाद्युक्तं तन्मते शाब्दबोधस्य पदज्ञानकरणकत्वात्तत्वाक्यार्थानुभवस्यैव महावाक्यार्थवोधहेतुत्वात्॥ ॥ इत्यन्विताभिधानप्रकरणम् १२

१२ ५

दवा ०

नचोत्पाद्येति॰ भो सुरधुनि त्वं अत्रभवती पूज्या घटादिवदुत्पाद्या ग्रामवत्प्राप्या क्षववद्विकार्या व्रीह्यादिवत्संस्कार्या वा न भवसि उत्पाप्तिविकिविका
रसंस्काररूपाः क्रियास्त्वयि न सन्तीति यावत् नच श्रोत्या उपास्तेः शेषत्वपदवीं भजसि उपासनाशेषत्वेन न त्वं श्रुतिप्रतिपाद्येति यावत् हि यस्मा
त् श्रुतिगतो ग्रोत्वः शब्दः तेनैवैकेन अधिगमिता बोधिता जगदुद्धारं विना विरहिता जगति कार्यरूपो विषयो यस्याः ईदृशी त्वं एभ्यो जनेभ्यः अमृतं
मोक्षरासेवदेदासेवेत्यर्थः अयं भावः यद्यपि तत्त्वमस्यहं ब्रह्मास्मीत्युपदेशमात्रेण मोक्षादर्शनात् मननादेश्च विधानात् प्रतिपत्तिविधिपरा एव
वेदांताः प्रतिपत्तिविधिशेषत्वेनैव ब्रह्मावगमयंतीन साक्षात् मोक्षोपि विधेयोपासनफलत्वेनैवाभ्युपगंतव्य इति वक्तुं शक्यं तथापि ब्रह्मसा

नचोत्पाद्याप्यावा सुरधुनि विकार्यात्रभवती नवा त्वं संस्कार्या भजसि न च शेषत्वपदवीम् ॥
उपास्तेः श्रोत्याहि श्रुतिगतरवेकाधिगमिताऽमृतं रासेवैभ्यो विरहितजगत्कार्यविषया ॥ १२ ॥

क्षात्कारस्य परमानंदाभिव्यक्ते दुःखोच्छेदस्य च फलस्यात्मानं चेद्विजानीयादिति श्रुतिसिद्धत्वान्मननस्य च श्रवणवदप्रतिबद्धापरोक्षसा
क्षात्कारार्थत्वात् साक्षात्कारस्य च दृष्टफलत्वादवगतब्रह्मणश्चापूर्वानुपयोगादुपासनासाध्यत्वे मोक्षस्योपासनावत्तारतम्यापत्ते
श्चनोपास्तिविधिपरा वेदान्ताः न वा विधेयत्वेन ब्रह्मावगमयति तथासत्यहं ब्रह्मासिद्धिप्रसंगात् प्रत्यक्षादिविरोधेऽन्यपरवाक्यान्त
दसिद्धारोपेणाप्युपासनसंभवात् ॥ इति ब्रह्मणि क्रियानपेक्षं प्रामाण्यं ॥ १२ ॥

गं॰ ल॰ ६

6

उदाहृत्येति ॥ भो सुरधुनि निगमपथ्वः श्रुतिनिपुणाः अस्य तनुभृतः जीवस्यैक्यं उदस्य हरीकृत्य सोयमिति उदाहृत्य यत्सर्वविषयैर्विरहितपदं श्रो
तं तत्त्वं प्राहुः तदेव त्वं पूर्णा अथापि अखिलं उद्धर्त्तुं जलतनुरसीत्यन्वयः ॥ अयं भावः यद्यपि सोयं देवदत्त इत्यत्र सशब्देनातीतदेशकालपरि
त्यागेनलक्षितेन देवदत्तस्वरूपे वर्त्तमानदेशकालवैशिष्ट्यस्यायंशब्देन प्रतिपादनात्तावतैव पूर्वोत्तरदेवदत्तस्वरूपाभेदसिद्धेः केवलव्य
क्तिमात्रपरतायां मानाभावात्तत्दृष्टान्तेन तत्त्वमस्यादिवाक्यानां शुद्धाभेदपरत्वमयुक्तम् ॥ तथापि विशिष्टस्य केवलाद्भिन्नतयाऽतद्धि

वर्त्तमानदेशकाल वैशिष्ट्यविधान=

उदाहृत्य प्राहुर्निगमपथ्वः सोयमिति यत्परं तत्त्वं श्रोतं विरहितपदं सर्वविषयैः ॥
उदस्यास्यैक्यं तनुभृत इहास्यत्र भवती तदेव त्वं पूर्णाऽम्ब ततनुरिहोद्धर्त्तुमखिलं ॥ १३ ॥

धानानुपपत्तेः केवलविशिष्टयोरभेदस्य प्रतिपाद्यत्वाभावात् तन्नेदस्त्वा विशिष्टयोस्त्वन्यतरविशेषणस्यान्यतरविशेषणविशेष्याभ्यामभेदपत्त्यासु
तरां बाधात् तु तत्तेदन्तोपलक्षितशुद्धव्यक्तिमात्रपरत्वं सोयमिति वाक्यस्य किं च सोयमिति वाक्यं अखण्डार्थपरं अकार्यकारणमात्रद्रव्य
निष्ठत्वे सति सामानाधिकरण्यवाक्यत्वात् व्यतिरेके संमतवत् नीलमुत्पलमित्यादिवारणाय सत्यन्तम् कुण्डवदरमित्यादिवा
रणाय विशेष्यम् ॥ ॥ इति लौकिकाखण्डवाक्यार्थनिरूपणम् ॥ १३ ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥

राम॰ ६

गिरामिति॥ मोसुरधुनिमत्सज्ञानाह्वयसुखमुखानां गिरां भगवती षडैश्वर्यसंपन्ना त्वमेवाखंडार्थः अनेन पदार्थाखंडार्थता दर्शिता वाक्याखंडार्थतामाह
त्वमिति तथैव तत्त्वमसि अहं ब्रह्मास्मीति श्रुतिगिरां वेदवचसां महावाक्यानां अखंडार्थस्त्वमेव अथापि इह मुविजनेषु दृष्टिपथं प्रत्यक्षविषयतां नि
यतं यासि जलरूपेणेति शेषः अतः सर्वाघहरणसमर्था त्वमेवेत्यन्वयः सत्यादिवाक्यानां स्वरूपमात्रपर्यवसायि त्वलक्षणमखंडार्थत्वं प्रकृष्टप्रका
शवाक्यलक्षणवाक्यत्वाद्बोध्यम् पूतो वेत्यादिवाक्यानामपि लक्षणया लक्ष्यबोधकत्वस्य समानत्वेपि सत्यादिवाक्यानां स्वरूपे भ्रमसंशयनि

गिरां सत्यज्ञानाद्वयसुखमुखानां भगवती त्वमेवाखंडार्थस्त्वमसि तदहं तच्छ्रुतिगिराम्॥

वर्त्तकलक्षणतो लक्ष्यसमर्पकत्वलक्षणो विशेषो ग्रंथांतरे द्रष्टव्यः तत्त्वमस्यादिवाक्यानां त्वखंडार्थपर्यवसायित्वं सोयमिति वाक्यवत्क
थितं हेतुभागं त्वमहं शब्दलक्ष्यार्थः साक्षात्स्वयं कूचितिः परा॥ तद्ब्रह्मशब्दलक्ष्यार्थः सैव नात्र विचारणा॥ तदर्थैक्यविरुद्धांशांस्त्यक्त्वा
वाच्यगतं श्रुतिः॥ अविरुद्धचिदाकारं लक्षयित्वाब्रवीति हि॥ त्वमहंशब्दलक्ष्यस्य चिन्मात्रस्य परात्मना॥ एकत्वं यस्त्वतः सिद्धं स
हि वाक्यार्थ असि इति स्कंदपुराणवाक्येष्ववबोध्यम्॥ ॥ ॥ ॥ ॥ ॥
इष्यते

ग.ल.

७

ननुमहावाक्यार्थस्यैक्यस्य संसर्गत्वे अखंडार्थत्वभंगः शुद्धव्यक्तिमात्ररूपत्वे तु महावाक्यमवान्तरवाक्यानुवादकं स्यादिति चेन्न शुद्धैक्यस्य शु
द्धव्यक्तिमात्ररूपत्वेपि तत्त्वमादिपदवाच्यार्थप्रतियोगिकतादात्म्यसंसर्गधीपूर्वकशुद्धधीजनकत्वं महावाक्यानामेवेति नावांतरवाक्यानुवाद
कत्वमिति भावः॥ अयं निष्कर्षः॥ यद्यपि नीलोत्पलादिवत्सत्यादीनां गुणगुणिभावेनापि सामानाधिकरण्योपपत्तेर्लक्षणाहेतोर्मुख्यार्थपरि
ग्रहानुपपत्तेरभावाद्देलक्षणया अयोगाच्च न सत्यादिवाक्यं प्रकृष्टप्रकाशवाक्यवदखंडविषयं एवं तत्त्वमस्यादिवाक्यमपि न सोयं देवदत्त इ
तिवदखंडार्थविषयं तत्र देवदत्तयोरिव तत्त्वंपदवाच्यविशेषणयोः समकालिकत्वबाधाभावादिति वक्तुं शक्यं तथापि किं तद्ब्रह्मेति ब्रह्मबुभुत्स

तथैवाखंडार्थः सुरधुनि समस्ताघहरणे समर्थाकारुण्यादिह दृशिपथं पासि नियतम्॥१४॥

याप्रवृत्तसत्यादिवाक्यस्य गुणगुणिभावपरत्वेऽनवच्छिन्नवस्तुपराणां ब्रह्मानंतादिशब्दानामनन्वयः प्रसज्येत यतो वाचो निवर्तन्त इ
त्यवाङ्मनसगोचरत्वश्रुतिर्नेह नानास्तीत्यादिसर्वप्रतिषेधश्रुतिश्च बाध्येतातो न तन्नीलोत्पलवाक्यवद्विशिष्टविषयं किंतु प्रकृष्टप्र
काशवाक्यवदखंडार्थविषयमेव एवं तत्त्वमसीत्यपि अखंडैकरसवस्तुपर्यवसानमंतरेण प्रामाण्यानुपपत्तेः संवेशोऽबाधितविषयकधी
करणस्यैव प्रमाणत्वादित्याद्यन्यत्र विस्तारः॥ ॥ इति वेदिकाखंडवाक्यार्थनिरूपणं।१४॥

७

अत्रेोषाद्इति ॥ भो सुरधुनि अत्रोषा वेदान्ता भवतीं लक्ष्यां लक्षणाविषयां अभिदधति वदंतिय तस्त्वं सु मानां तरचयैः अगम्या विज्ञात्री विन्यस्तः सक्तः अन्ततो जगद्रूपस्तनुविशेषो यया अत्र भवती पूज्या अतः कारुण्यात् जनानां अमृतलक्षणरसस्य धारां वितरसी सन्वयः निरवधिमोक्ष सुखं ददासीति यावत् अयं भावः यद्यपि निर्विशेषतया ब्रह्मणि शक्तिरिव प्रमाणांतरानुपस्थिते सर्वसंबंधशून्ये लक्षणापि दुर्घटा प्रमाणांतरोपस्थित एव देवदत्तादौ तदादिपदानां लक्षणाया दर्शनादिति वक्तुं शक्यं तथापि विशिष्टस्यैव तद्घटके चिदंशस्यापि शक्त्यैवोपस्थितौ सत्यां ज

अत्रेोषा वेदांता अभिदधति लक्ष्यां भगवतीमगम्या विज्ञात्री सुरधुनि सुमानां तरचयैः ॥

अहो त्वं विन्यस्ताऽन्ततनुविशेषात्र भवती जनानां कारुण्यादमृतरसधारां वितरसि ॥ १५ ।

उक्ताव च्छिन्नं मिथ्येति बोधिते सति तर्काम्बुद्धोपस्थितौ सत्यामाध्यासिक विशिष्टतादात्म्यवति भागत्यागशक्तिः सुकरा न च विशेषणस्य बाधान्नत्रानन्वयो न तु विशेष्ये लक्षणेति वाच्यं परिभाषामात्रत्वापत्तेः अन्वयप्रतियोगिपदार्थमात्रस्य वृत्त्योपस्थित्यंगीकारात् तदुक्तं शक्याद्न्येन रूपेण ज्ञाने भवति लक्षणेति स्यादेतत् विशिष्टेपि पदानां शक्तिः कथं ग्राह्येति चेत् यूपाहवनीयादिवदिस्यवेहि ॥ ॥ इति ब्रह्मवृत्तिनिरूपणं ॥ १५ ॥

कृशानुरिति। भोः सुरधुनि निगमः वेदः कृशानुः अग्निः सुत्रामा इन्द्रः अथ मरुत वायुः विधुः चन्द्रः सूर्य इति अर्थवादैर्मंत्रैर्वा भवतीमेव वदति यागे॥
यज्ञैः नियमभोगेः यमनियमादिभिः विषयतो विरागेः विषयवैतृष्ण्येन त्यागेः सन्न्यासादिभिः सदनुरागेः सत्प्रेमभिः त्वमेव पूज्येत्यन्वयः। ननु मंत्रा
र्थवादानां विध्येकवाक्यतया ऽन्यत्रतात्पर्यवतां स्वार्थे तात्पर्याभावात्कथं तैर्देवतासिद्धिरिति चेन्नैवं प्रमाणान्तरतः प्राप्तिविरोधयोरसतोः
पदसमभिव्याहारलभ्यार्थमात्रेणापि स्वप्रामाण्यानतिवृत्तनियमाभ्युपगमात् अन्यथा रेवतीषु वारवंतीयमग्निष्टोमसाम कृत्वा पशुकामो
ह्येतेन यजेतेति वाक्याद्रेवत्याधारवंतीयसामसाध्याग्निष्टोमस्तोत्रविशिष्टकर्मविधिपराद्रेवती ऋचः सधयाद इत्यादिकः कुत्र याधारवारवंती

कृशानुः सुत्रामा मरुदथ विधुः सूर्य इति चार्थवादैर्मंत्रैर्वा वदति भवतीमेव निगमः॥
त्वमेवेज्यायागेऽपि नियमभोगे विषयतो विरागे त्यागे वा त्वयि सदनुरागेः सुरधुनि १८॥

यसामरूपमग्निष्टोमस्तोत्रस्य विशेषणं न सिद्ध्येत् कवतीषु रथंतरं गायेदिति वद्रेवतीषु वारवंतीयं गायेदिति तत्प्रमापकविध्यंतरासत्त्वात् नचा
स्यैव विशिष्टगोचरस्य विधेर्विशेषणविधावपि तात्पर्यवत्त्वं कल्प्यं विध्यावृत्तिप्रसंगात् तस्माद्विशिष्टविधेर्विशेषणस्वरूपे तात्पर्याभावेन प्रसि
द्धाश्रयणीयाऽस्वमंत्रार्थवादादिभिस्तात्पर्यरहितैरपि देवान्न निवार्यते अन्यार्थप्रवृत्तस्यापि प्रमाणस्य प्रमाणस्वाभाव्येन याव त्स्वविषयपरिच्छेद
कत्वावश्यंभावात् ननु मंत्रार्थवादबलाद्धरिरिदेवताभ्युपगमे विग्रहवतोऽनित्यत्वापत्तेः शब्दार्थसंबंधस्यानित्यत्वप्रसक्तिः संबंध्यनित्यत्वे तत्संबंधे
स्यानित्यत्वात् न चेष्टापत्तिः तथा सति तस्य पुरुषकृतत्वप्रसक्त्या निरपेक्षत्वहानेर्वेदस्याप्रामाण्यप्रसंगादिति चेन्नैवं गवादिशब्दानामिवेन्द्रादिशब्दाना
मप्याकृतिवाचकत्वादाकृतीनां च नित्यत्वाच्छब्दार्थसंबंधस्य नित्यत्वसिद्धेः तदेवं मंत्रार्थवादानां प्रामाण्ये तन्मूलकेतिहासपुराणानामपि प्रामाण्य

मित्यास्तां विस्तारः॥ इति मंत्रार्थवादप्रमाण्यनिरूपणप्रकरणम्॥१८॥

स्वत इति॥ भो सुरधुनि श्रुतिः वेदः इह सकलं कुतर्कोत्थं मानं निरस्य स्वतःप्रामाण्येनैव पराद्वैतां सुखघनां त्वां भगवतीं संबोधयति अथापि हे ज
ननि त्वं तु गतये नॄणामर्थात् कृपापारावाराकारुण्याब्धिरूपा सुवारात्मकतनुः सज्जलशरीरेत्यन्वयः॥ अयं भावः॥ यद्यपि सर्वप्रतीतीनां प्रमा
ण्यं ज्ञानकारणातिरिक्तकारणाजन्यं प्रामाण्याप्रामाण्ययोरन्यतरत्वात् अप्रामाण्यवत् यदि प्रामाण्यं ज्ञानकारणमात्रात्तथा सति सर्वज्ञानं प्रमा
णं स्यादिति प्रमाणाप्रमाणविभागो न स्यात् तस्मात् परत एव प्रामाण्यमिति वक्तुं शक्यं तथापि न ज्ञानकारणातिरिक्तकारणाजन्यं अनुपलम्भप्रमा
णं तदतिरिक्तकारणकत्वात्॥ न चालोकादिसहकृतं चक्षुरादिज्ञानकारणं तत्कृतगुणोंजनादिः प्रामाण्यकारणमिति कारणभेदोऽस्य

स्वतः प्रामाण्येन श्रुतिरिह निरस्यैव सकलं कुतर्कोत्थं मानं चितिसुखघनां त्वां भगवतीम्॥
पराद्वैतां सत्यां वदति जननि त्वं तु गतये कृपापारावारा सुरधुनि सुवारात्मकतनुः ॥१७॥

वेति वाच्यं अंजनादिमतोपि भ्रांत्युपलंभात्॥ न दृष्टोंजनादिः प्रामाण्यकारणं नाप्यदृश्यमानगुणकल्पनायां प्रमाणमस्ति स्वत एव चक्षुरा
देरप्रतिबद्धा प्रामाण्यजन्मोपपत्तेः अप्रामाण्यं तु दोषसहकारात् तस्मात्प्रामाण्यं स्वत एव प्रतीतीनां यदा तदा सुतरां वेदस्य नित्यत्वनिर्दो
षत्वादित्यधिकमाकरे॥ अत्र कुतर्कोत्थमान्यमिति कथनेन दोषसंभावनयाऽन्यस्याप्रामाण्यमिति ध्वनितं॥ इति वेदस्य स्वतःप्रामा
ण्यनिरूपणम्॥ १७ ॥

गं॰ल॰
९

यद्दृचुरिति॥ भोस्तरधुनि वेदांताधिगतमतयः श्रौतं वचः तत्त्वावगमकरणं त्वन्मतिकरं यद्दृचुः परमन्यत् अनृतपदं मिथ्याविषयं त
ज्ज्ञानाय मिथ्यावस्तुबोधाय ऊचुः अथापि त्वं दीनेभ्यः तत्त्वज्ञानं दातुं जलरूपाविजयसे इत्यन्वयः॥ अयं भावः॥ यद्यपि सर्वप्रमाणं तत्त्वावे
दकमेव युक्तं प्रमाणत्वाविशेषात् प्रमाणमतत्त्वावेदकं चेति विप्रतिषेधात् इत्थं च प्रत्यक्षादिविरोधादहेतागमस्य मुख्यार्थासंभवे स्तुतिगुण
वादेनैव प्रवृत्तिर्युक्तानप्रत्यक्षाद्युपमर्दकत्वं युक्तमिति वक्तुं शक्यं तथापि स्यादेतदेवं यदि प्रत्यक्षागमयोरविशिष्टमसंभावितदोषकार

यद्दृचुर्वेदांताधिगतमतयस्त्वन्मतिकरं वचः श्रौतं तत्त्वावगमकरणं वानृतपदम्॥
परं तज्ज्ञानायेत्यहह भवती तत्त्वधिषणप्रदातुं दीनेभ्यो जननि जलरूपा विजयसे।१८

णजन्यत्वं स्यान्न त्वेतदस्ति तथा हि॰ इन्द्रियजन्यं विज्ञानं कचिद्विषयदोषाद्दुष्यति तथा हरस्येक्क चिदिंद्रियदोषात् यथा शुक्तिरजता
दौ कचिदंतःकरणदोषात् यथा देहाद्यात्मत्वे अतः संभावितदोषकारणं प्रत्यक्षं शब्दस्य तु स्वतो दोषत्वकल्पनायां तज्जनितविज्ञान
स्य सर्वस्याप्रामाण्यप्रसंगात् नित्यतया वेदवाक्यस्य पुरुषसंबंधनिमित्तदोषाभावाच्च असंभावितदोषकारणजन्यमेव वैदिकज्ञानं अ
तः प्रत्यक्षादागमो बलीयानित्यधिकमाकरे॥ ॥ इतितत्त्वावेदकप्रामाण्यनिरूपणप्रकरणम् १८॥

९

श्रुतिरिति॥ भो गंगे नित्या श्रुतिः सकलं लोकं अधिकारं संवीक्ष्य केषांचित्तु व्रतविधिं केषांचित् तपः केषांचित् सुतीर्थसेवां केषांचित्तीर्थे दानं केषांचित्तु ते नमस्कारादिभक्तिं अविरतं तव सुखघनायाः मत्येव वदतीत्यन्वयः नित्यत्वमत्रापौरुषेयत्वं नाविनाशित्वं ब्रह्मव्यतिरिक्तस्य तेद नभ्युपगमात् यद्यपि वेदो विशिष्टबहुज्ञपुरुषप्रणीतो भवितुमर्हतीति बह्वर्थविषयवाक्यप्रमाणत्वात् यदेवं तन्नथा यथा व्याकरणादि पाणि न्यादि विरचितं तथायमुक्तसाधनो वेदस्तस्मादुक्तसाध्य इत्यनुमानात् इदं सर्वमसृजत ऋचो यजूंषि सामानि चेति श्रुत्या वेदस्यापौ रुषेयत्वसिद्धेर्निरतिशयाप्रतिहतेश्वर विज्ञानमूलकत्वेनैव वेदस्य प्रामाण्यं न स्वत इति वक्तुं शक्यं तथापि पूर्वसिद्धस्य वेदस्योच्चार्य

श्रुतिर्नित्या लोकं सकलमवितुं चातिकृपयाऽधिकारं संवीक्ष्य प्रवदति मखं च व्रतविधिम्॥
सुतीर्थानां सेवां तप उत सुतीर्थे वितरणं नुतिं गंगे मत्येवं ते सुखघनाया अविरतम्॥ १९॥

माणत्वरूपपौरुषेयत्वसाधने सिद्धसाधनात् प्रमाणान्तरेणार्थमुपलभ्य रचितत्वरूपपौरुषेयत्वसाधनं तु धर्माधर्मयोः प्रमाणा न्तरायोग्यतया बाधितं न च स्वाभाविकज्ञानमादायेश्वररचितत्वं साध्यं ईश्वरस्य विधूताखिलकार्यकारणपरिकरत्वेनास्यापि वा धात स्मात् ज्ञानपूर्वकत्वाभावात् स्वत एवार्थावबोधनादपौरुषेयत्वमेव विरूपनित्यया वाचेति श्रुतेः अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा॥ आदौ वेदमयी दिव्या ततः सर्वाः प्रवृत्तय इति स्मृतेश्चेति भावः॥ ॥ इति वेदस्यापौरुषेयत्वनिरूपणम्॥ १९॥

गं॰ स्त॰
१०

ने॰८

भवत्य इति ॥ भो सुरधुनि यं स्तुवक्तुं सर्वा ऋग्याद्या गिरः भवत्याः निःश्वासस्तत्त्वमेव योगैः सुकृतैरपि च प्राप्या भगवती त्वं त्रयाणां लोकानां गतत्वे त्रिपथगासीत्यन्वयः अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इतिहासपुराणं तस्यैवेदानुपुराणानिदन्तवानग्रजन्मेरस्यादिश्रुतिस्मृतिवाक्यात् ब्रह्मण एव वेदपुराणादिकर्तृत्वं व्यासस्य तु विभज्य संक्षेपकत्वमात्रमिति भावः ॥ अयं निष्कर्षः ॥ कर्तृत्वमिह नार्थमुपलभ्य रचयितृत्वं वेदस्य सापेक्षत्वलक्षणपौरुषेयत्वापातात् तन्नाप्युच्चारयितृत्वं अध्यापकसाधार

भवत्या निश्वासः सुरधुनि ऋचः सामयजुषी तथाथर्वा सर्वा गिर उत न स्तुवक्तुं यदिह तत् ॥
त्वमेवाप्या योगैरपि सुकृतजालैर्भगवती त्रयाणां लोकानां गतय इह जाता त्रिपथगा ॥२०॥

एव प्रसंगात् किं तु ब्रह्मस्वतंत्रमप्यध्येतॄणां पुरुषार्थसिद्धये नियतं क्रमं स्वराद्यपेक्षमाणां पूर्वकल्पेषु स्वकृतेनैव नियतेन क्रमादिना विशिष्टान्वर्णान्करोति सर्गादौ भगवान् धाता यथापूर्वमकल्पयदिति स्मृतेः एतदेवाध्यापकवैलक्षण्यं ब्रह्मणो वेदकर्तृत्वं यदन्यदीयक्रमाद्यनपेक्षणेन पूर्वमपि स्वकृतेनैव क्रमेण विशिष्टेषु वैदिकवर्णेषु कर्तृत्वं तथा चापौरुषेयत्वं वेदस्य न पुरुषप्रणीतत्वाभावः किं तु स्वतंत्रेणार्थमुपलभ्य तेन हेतुना विरचितवर्णपदानुपूर्वीविशेषरूपसंदर्भत्वं यत्पौरुषेयत्वं तदभाव एवेत्यधिकमस्मत्कृताद्वैतवादावल्याम् ॥ ॥ इति वेदस्य ब्रह्मपारतंत्र्यम् ॥२०॥

१०

भवत्यमिति॥भो गंगे सत्यात्माऽद्वयसुखसमुद्ररूपायां भवत्यां इयं त्रिजगती विरिंच्यादिकगणाश्च फेनोद्गमइव विभाति यथा ज्ञानात् संस्कारोद यवज्ञात् स्वप्रधिषणा सद्कल्लोलः सद्द्वयतरंगस्तद्वत् अतः सर्वाधिष्ठानसद्द्वयाभिन्नात्वमेव शर्मकरणं शरणमित्यन्वयः॥ अयं भावः॥ यद्यपि प्रपंचः पारमार्थिकत्वे मिथ्यात्वे प्रमाणानुपलंभात् यथात थ्यतोऽर्थान् व्यद धादित्यादि सत्यत्वश्रुतेश्च यदि च मिथ्यैवायं द्वैतप्रपंचस्तदा तद्विषयप्रत्यक्षादेरप्रामाण्यात्तदुपजीवककर्मकाण्डज्ञानकांडयोरप्यप्रामाण्यात् स्वर्गापवर्गार्थिप्रवृत्त्यनुपपत्तिस्तस्मा न्न मिथ्येति वक्तुं शक्यं तथापि अथात आदेशो नेति नेति नत्वेतस्मादिति नेत्यन्यत्परमस्ति अतोऽन्यदार्त्तमिंद्रजालमिव मायामयं स्वप्नद

भवत्यां सत्यात्माऽद्वयसुखघनाब्धौ त्रिजगती विभातीयं फेनोद्गमइव विरिंच्यादिकगणाः॥
सदुल्लोलः संस्कृत्युदयवशतः स्वप्नधिषणा यथाज्ञानाद्गंगे त्वमसि शरणं शर्मकरणम्॥२१॥

वन्मिथ्या दर्शनमित्यादिश्रुतेः प्रपंचो मिथ्या दृश्यत्वात् स्वप्नवत् शुक्तिरजतादिवच्चेत्याद्यनुमानाच्च मिथ्यैव मिथ्यात्वेऽपि तत्प्रत्यक्षादेः प्रमाणत्वं विरोध प्रत्यक्षस्य परमार्थविषयत्वाभावाद्व्यावहारिकप्रामाण्याभ्युपगमात्तदुपजीवकधर्मब्रह्मतत्त्वावेदकप्रामाण्याक्षतेः नवा सत्यत्वश्रुतिविरोध स्तस्या लौकिकपरमार्थाभिप्रायत्वात्॥ न च मिथ्यात्वानुमाने सबाधकाभिमतावाध्यदोषप्रयुक्तभानविषयत्वमुपाधिः लाघवा द्गृहीतव्याप्तिकेन दृश्यत्वेन पक्षे मिथ्यात्वसिद्धावुपाधेस्तत्र साध्याव्यापकत्वनिश्चयात्॥ इति प्रपंचमिथ्यात्वप्रकरणम्॥२१॥

गं.ल.
११

यदीयेति॥ भो गंगे यदीयाम् अनिर्वाच्यां मायाम् अर्थात् भ्रमरूपां अपरे मीमांसकाः अख्यातिं विविक्तज्ञानाभावं अर्थात् ग्रहणस्मरणात्मकज्ञा
नाद्वयरूपां वदंति च पुनः अपरे नैयायिकाः अन्यथाव्यधिकरणधर्मप्रकारिकां ख्यातिं ज्ञानं वदंति इतरे योगाचारादयः आत्मैकस्यात्ममात्र
स्य मतिं आत्मख्यातिरूपां वदंति अपि तथा परे भ्रांताः माध्यमिकाः शून्यं अर्थात् असत्ख्यातिं वदंति सा त्वं सकलविषयाधिष्ठितिपदा स
कलकल्पनाधिष्ठाने चिदानंदा वेदांतैः च जगता विजयसे इत्यन्वयः॥ अयं भावः॥ शुक्तिरजतादिविभ्रमस्थले इतिमिति पुरोवर्त्तिनो ग्रह

दमि

णं रजतमिति रजतस्मरणं तयोश्च ग्रहणस्मरणयोस्तद्विषययोश्चासंसर्गाग्रहाद्विशिष्टव्यवहार इत्यख्यातिरिति मीमांसकास्तन्न सम्यक्

यदीयानिर्वाच्यामभिदधति चाख्यातिमपरेऽन्यथाख्यातिं चात्मैकमतिमपि तां शून्यमितरे॥
परे भ्रांतास्त्वं सा सकलविषयाधिष्ठितिपदा चिदानंदा गंगे श्रुतिगिरिगता त्वं विजयसे॥२२॥

रजतत्वप्रकारकपुरोवर्त्तिविशेष्यकप्रवृत्तिं प्रति तादृशज्ञानत्वेन हेतुतायाः सत्यरजतप्रवृत्तौ क्लृप्तायाः इह बाधेन हेत्वंतरकल्पने गौरवात्
एवं देशांतरवर्त्तिरजतस्य पुरोवर्त्तित्वेन भानमित्यन्यथाख्यातिरिति नैयायिकमतमपि न सम्यक् असन्निकृष्टरजतस्य प्रत्यक्षायोगेन ज्ञा
नलक्षणसन्निकर्षांतरकल्पने गौरवात् ज्ञानादात्म्यस्यात्यंताप्रसिद्धत्वात् तस्य ज्ञानलक्षणयापि भानासंभवात्· एवं नात्मख्यातिः आत्म
भिन्नस्य भानेऽतिप्रसंगात्· नाप्यसत्ख्यातिः असतो भानायोगात्· निर्विषयस्य च भानस्यासंभवात् तस्मादनिर्वाच्यमेव तत्र रजतं तत्सं
बंधादिकं भाति न च प्रातिभासिकतावत्कल्पनापेक्षया सन्निकर्षकल्पन एव लाघवमिति वाच्यम्· रजताभाववद्विशेष्यकर
जतत्वप्रकारकज्ञानत्वापेक्षया रजताभाववन्निष्ठरजतत्वसंबंधावच्छिन्नतावच्छेदकत्वे लाघवात्॥ इत्यनिर्वाच्यख्यातिप्रकरणम्॥२२॥

११

ननानेति ॥ भो सुरधुनि इह नानानास्तीति श्रुतिवचनजातैर्भेदं निरस्यैव भगवती त्वं स्वयं भासि अत एव त्वं परमात्मा सच्चित्सुखरूपा तत्तत्कारणात् जनताजनस
मूहः मोक्षार्थं त्वदीयं जीवनपदं जीवनस्थानं जलस्वरूपं च सेवते इत्यन्वयः ॥ अयं भावः ॥ यद्यपि भेदो द्विविधः एकः पदार्थानामन्योन्याभावाधिक
रणतायोग्यात्मकः यथा रजतादेः शुक्तिकादिसंसर्गायोग्यतादिलक्षणः स च पदार्थधर्म एव द्वितीयः पदार्थानामसंकररूपः स तु पदार्थरूपावगति
वत्त्वाद्यस्य न धर्मिप्रतियोग्यपेक्षा रूपरसादिस्वरूपस्यैव भेदत्वात् तत्स्य च प्रतियोग्याद्यनपेक्षत्वात् एव मसंकरोपि रूपस्य रूपात्मनैव रसासिद्धः
स्वरूपस्यासंकरात्मनेवावभासनात् तत्ततीयानपेक्षणादिति सांख्याः न भेदो घटादिस्वरूपः शुक्लो घट इति वद्भिन्नो घट इति घटधर्मत्वेन भेद
स्य प्रतिभासात् घटादिस्वरूपत्वे भेदघटादिशब्दानां पर्यायतापत्तेश्च तस्माद्धर्मिप्रतियोगिसापेक्षो भेदोऽर्थान्तरमेव स च पंचविधो जीवेश्व

ननानेहास्तीति श्रुतिवचनजातैर्भगवती निरस्यैवाभासि स्वयमखिलभेदं सुरधुनि ॥
परात्मैकानित्याचितिसुखसमृद्धात्वमसि तत्त्वदीयं मोक्षार्थं श्रयति जनता जीवनपदम् ॥ २३ ॥

रयोर्जीवद्वयोर्जीवजगतोः परस्परं जीवानां तथा परस्परं जगतामीशजगतोश्चेति भेदादिति कणभक्षाक्षचरणतनयाः ॥ सर्वथा कर्तृकर्मादिभावान्यथानुप
पत्तेः सृष्टिश्रुतेर्हासुपर्णेत्यादिश्रुतेश्च प्रामाणिक एवेति वक्तुं न्याय्यम् तथापि नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्य
तीत्यादिश्रुतिविरोधात् पंचविधोपि भेदोऽप्रामाणिक एव न च कर्तृकर्मादिभावानुपपत्तिः यावत्सत्प्रपंचाभासमनिर्वाच्यभेदस्याभीष्टत्वात् द्वासुपर्णे
त्यादिश्रुतयस्तु प्रत्यक्षसिद्धभेदस्यानुवादाः न चेत्राधर्मिकजीवभेदस्याप्राप्त्याऽननुवादत्वं जीवेश्वरभेदस्य प्रत्यक्षसिद्धत्वया तदन्यथानुपपत्तिसि
द्धेश्च धर्मिकजीवभेदस्यापि प्रत्यक्षसिद्धतुल्यकक्षतया तद्बोधकश्रुतेरनुवादकत्वोपपत्तेः न च द्वयोः प्रणयन्तीति वत्साप्रविलक्षणपरत्वमुपपद्ये
रातिरित्येव ब्रूयादिति वत्प्रतिमसवार्थत्वं वाक्यम् भेदद्व्यमानाभावात् अद्वैतश्रुतेस्तु पेक्षयाहीनबलत्वेन प्रतिप्रसवयोगाच्चेति संक्षेपः ॥ इति स्वरू

॥ सुरधुनीस्तुतिटीका

गं॰ल॰
१२

सदात्वमिति॥ भो सुरधुनि परशिवे त्वं प्रयोजनमनपेक्ष्यैव अशेषाणां स्थितिः पालनं उत्पत्तिः भंगः लयः एकः विभवः ऐश्वर्यं यस्याः सा त्वं न भिन्ना
कार्यात् अद्वैतश्रुतिविरोधात् नाप्यत्यंतमभिन्ना कार्यकारणभावानुपपत्तेः नापि भेदाभेदविशिष्टा विरोधात् अतः नंतां त्वां सुखाय त्रिप
गां नमस्कुर्मः इत्यन्वयः॥ अयं भावः॥ यद्यपि सन् घटः सन् पटः इति सदात्मना तावत्सर्वमेकात्मकं प्रतिभाति घटपटादिरूपेणानेकात्मकं
चोपलभामहे ततश्चोभयात्मकत्वानुभवादेकानेकात्मकं जगत् न च विरोधः अहिकुंडलवदवच्छेदकभेदेनाविरोधादिति वक्तुं शक्य
म् यद्यपि सदेव सोम्येदमग्र आसीदितिश्रुतिप्रमिताभेदविरोधेन भेदस्य तात्विकत्वेनैव प्रपञ्चे तात्विकत्वे मानाभावान्नावच्छेदक

सदा त्वं सर्वज्ञा सकलसुखयाचितपदाऽनपेक्ष्यैवाशेषस्थितिजननभंगैकविभवा॥
न भिन्ना नाभिन्ना कथमपि कृतश्चित् परशिवे नमस्कुर्मो नंतां सुरधुनि सुखाय त्रिपथगां॥२४

भेदाभेदौ

भेदेनापि तौ समसत्ताकौ वक्तुं शक्यौ अवच्छेदकस्यापि भेदाभेदविकल्पेऽवच्छेदकांतरापेक्षायामनवस्थानाच्च तस्मादभेदस्ता
त्विको भेदस्त्वाध्यासिक एव, नानात्वैकत्वमेतावद्द्रष्टव्यं शास्त्रनिश्चयात् महाकोऽम्बरे यद्वदन्यत्वं न तद्वदेतयोरिति भारतवचनं तु बुद्धि
क्षेत्रज्ञपरं भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदित्यधिकरणे न व्याख्यातप्रायम् बुद्धिक्षेत्रज्ञयोरीश्वराभेदेऽप्यब्धितरंगवत्कथंचिद्भे
दादित्यधिकमाकरे॥ इति भेदनिरासप्रकरणम्॥ २४॥ ॥ ॥ ॥ ॥ ॥ ॥

१२

12

वचइति॥सोमीष्मजननिमदेवेत्यादिश्रुतिवाक्यं अथातोब्रह्मजिज्ञासेत्याद्यनावृत्तिः शब्दादित्यंतं व्याससवाक्यं च विचार्य क्षेत्रज्ञादिज्ञैः क्षेत्रक्षेत्रज्ञान्त
र्यामिविद्भिः श्रुतिभिर्यत्सरं त्रिविधपरिच्छेदशून्यं ब्रह्मविद्यया प्राप्तुं शक्यं विद्याप्रकारमाह॥ त्वंपरमात्मैवाहं अहंच देहेंद्रियादिसाक्षी त्वमेवेति
त्तेषं प्रत्यगात्मनोऽब्रह्मत्वभ्रमनिवृत्त्यै ब्रह्मणश्च परोक्षत्वभ्रमनिवृत्त्यै व्यतिहारेणज्ञेयं तदेवेदमपरोक्षं ब्रह्म तत्त्वं त्वमसि जनेोद्दारायव्यक्तांभ
गवतीत्वात्स ततमभिवंदइत्यन्वयः॥ अयंभावः॥ यद्यपि सर्वेपिवादिनो द्वैतमेवोपपादयंति अनुभूयतेपि तदेव सर्वैः सर्वसंमतं चाभ्युपगंतुं युक्त
म् तथाप्युपक्रमोपसंहारादिनाश्रुतेर्व्याससूत्राणां चाद्वैतपरत्वावधारणात् तदेवाभ्युपगम्यते तथाहि छांदोग्यश्रुतौ सदेवसोम्येदमग्र आ
सीदित्युपक्रम्य तत्त्वमसीति नवकृत्वोऽभ्यस्याचार्यवान्पुरुषोवेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति सफलीकृ

वचः श्रौतं व्यासोदितमपि विचार्याप्यमथपस्सरं क्षेत्रज्ञादिज्ञैः श्रुतिभिरहमस्मि त्वमिति च॥

त्ययेनाश्रुतं श्रुतं भवतीत्यर्थवादमुक्त्वा यथा सोम्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्यादित्यादि दृष्टांतैरुपपाद्यैतदात्म्यमिदं सर्वमित्युपसंहारः स्प (मादि^)
(के^ नेति^) ष्टः॥ बृहदारण्यके प्यात्मेत्येवोपासीतात्र ह्येते सर्व एकी भवंतीत्युपक्रम्य स एष नेति नेतीत्यादिनाऽभ्यस्य तं त्वौपनिषदं पुरुषं पृच्छामीत्यपूर्वपिता अभयं वै
जनक प्राप्तोसि ब्रह्मैव सन् ब्रह्माप्येतीति सफलीकृत्य तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवदित्यर्थवादमुक्त्वा स यथा दुंदुभेर्हन्यमानस्येत्यादिनो
पपाद्य पूर्णमिदमित्युपसंहारः स्पष्टः एवं सर्वत्रैव्यपि तथाहि तत्र भगवान्बादरायण अथातो ब्रह्मजिज्ञासेति त्रिविधपरिच्छेदशून्यब्रह्मणो मुमुक्षुपु
(दा^) रुषजिज्ञास्य ब्रह्मणः किंलक्षणं किंप्रमाणमित्याकांक्षायां जन्माद्यस्य यत इति सूत्रेण लक्षणं शास्त्रयोनित्वादिति सूत्रेण प्रमाणं चोपन्यस्य शा
स्त्रस्य कार्यपरत्वेन कथं सिद्धपरत्वमित्याकांक्षायां तत्तु समन्वयादिति सूत्रेण कार्यपरत्वनिरासपूर्वकं सिद्धब्रह्मपरत्वं बहुविधानेकन्यायैरुप
पाद्य पश्चादीक्षतेर्नाशब्दमित्याधिकरणेन जगतः प्रधानकारणकत्वं हरीकृत्य ब्रह्मण एव सर्ववेदांतानां

गतिसामान्यंच प्रतिज्ञायतदेव गतिसामान्यमानंदमयोभ्यासदित्यारभ्य प्रथमद्वितीयतृतीयपादैरन्यार्थत्वशंकानिरसनपूर्वकमुपपाद्यचतुर्थपादेकैश्चिदधिकर
णैः प्रधानस्याशब्दत्वंप्रपंच्य प्रमाणोपन्यासनेनतच्च ब्रह्मणः प्रकृतित्वेन जगतो निमित्तत्वेन च प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधादित्यधिकरणेन व्यवस्थाप्य प्रथ
माध्यायं समापयामास ॥ अनंतरं च द्वितीये प्रथमपादेन स्वपक्षे सांख्ययोगवैशेषिकादिस्मृतिविरोधं परिहृत्य तैरुद्भावितसकलतर्कविरोधं अद्वैतसमन्वय
स्य सम्यक्परिजहार ॥ तदनु द्वितीयपादेन सांख्यवैशेषिकन्यायिकबौद्धजैनपक्षपाशुपतशैवपांचरात्राणां बहुलतरासारतरयुक्त्याभासकलिततत्वं केश्चिदधि
करणैः प्रदर्श्य तदस्थैश्वर्यं च प्रमाणयुक्तिसत्यतया प्रतिचिक्षेप ॥ ततस्तृतीयपादेन भूतभोक्तृश्रुतीनां चतुर्थेन लिंगदेहश्रुतीनां च परस्परविरोधं सम
गपाचकार ॥ एवं द्वितीयाध्यायेनाद्वयसमन्वयविरोधं प्रतिक्षिप्य तृतीयाध्याये प्रथमपादे संसारिण इहामुत्र च गत्यागतिनिरूपणपूर्वकं संसारदो
षविवेचनेन वैराग्यमधिकारविशेषणं दृढीकृत्य तदनु द्वितीयपादेन वाक्यार्थदर्शनांगत्वेन ज्ञापयद्ब्रह्मस्वरूपं विविच्य त्वंपदार्थं दर्श्य ततत्पदार्थमपि सक
लद्वैतप्रपंचनिरासपूर्वकं प्रदर्शयामास ततस्तृतीयपादेन विधाभेदाभेदाभ्यां गुणोपसंहारानुपसंहारौ प्रदर्श्य यत्र विधिरूपावांतरवाक्य निषे^

तमेवाहं ज्ञेयं त्वमसि तदिदं भीष्मजननिजनोद्धारव्यक्तां सततमभिवंदे भगवतीम् ॥२५

प्रमाणत्वं

धरूपावांतरवाक्यस्य च परिमाणन्यायेन प्रदर्श्य ततश्चतुर्थपादेन पुरुषार्थोतः शब्दादिति बादरायण इति प्रथमाधिकरणेन ब्रह्मज्ञानस्य कर्मनिरपेक्षस्यैव मोक्षसाधनत्वं प्रसाध्य
तस्यैवासन्नांतरंगसाधनं संन्यासशमदमादिकं बहिरंगसाधनं यज्ञादिकं च प्रदर्श्य ज्ञानसाधनमनुष्ठितं चाप्रतिप्रतिबंधके ऐहिकफलं सतितन्निन्नमुत्रचेत्यंत्याधिकरणेनोक्त्वा तृ
तीयाध्यायं समापयामास ततश्चतुर्थे प्रथमपादे आवृत्तिरसकृदुपदेशादित्यधिकरणेन ब्रह्मसाक्षात्कारपर्यंतं श्रवणाद्यावृत्तिकर्त्तव्यतया प्रदर्श्य आत्मेति तूपगच्छंति ग्राहयंति
चेत्यधिकरणेन वाक्यार्थं च जीवब्रह्माभेदं सम्यक्प्रदर्श्य ततः सगुणोपासकस्य क्रममुक्तिमभिधाय द्वितीयपादेन पुनस्तस्यैवोत्क्रांतिप्रकारमुपवर्ण्य तदनु तृतीयेन उत्तरमा
र्गचिंतापूर्वकं तस्यैव कार्यब्रह्मप्राप्तिं प्रदर्श्य निर्गुणब्रह्मविदश्च गत्युत्क्रांतिं प्रतिषिध्य ततश्चतुर्थेन निर्गुणविद्याफलं ब्रह्मात्मनावस्थानमुपवर्ण्य सगुणविद्याफलं च ब्रह्म
लोके ऐश्वर्यमुपपाद्य तेषां समुल्लविद्यामप्यनावृत्तिः शब्दादिति ब्रह्मपदे प्राप्तिमुक्तिं प्रदर्श्याप्यपिरराम तथा च तदविरोधेन बहूक्तमपि हेतं नाभ्युपगंतुं युक्तं शतमप्यंधा
नां न पश्यतीति न्यायादिति संक्षेपः ॥ ॥ इति समन्वयप्रकरणम् ॥२५॥ स्थान्दृशितस्था॰ ४५ कृ॰ शि॰ = २ ॥२९॥

सदासंविदिति॥ भो गंगे सदा संविद्रूपा सुखघनात्मरूपा भगवती त्वं क्षेत्रयोगात् क्षेत्रज्ञा सती बहुविधतनूभिः देवनरादिशरीरभेदैर्बहुविधा भिन्ना भासि न तु स्वतो भिन्ना प्रमाणाभावात् किंच भो पुण्यनिवहे नोयस्य वपुषा उद्धाराय मोक्षाय निखिलजनतां समस्तमनुष्यादिसमूहं पुनासि त्वन्यः स्वयं पुण्यरूपतां गृहीत्वैवान्यान् पुण्यपात्रं करोषीति यावत्॥ अयं भावः। यद्यपि प्रत्यक्षेण त्वमहं ममाविति शरीरभेदेनात्मनो भेदावगमात् सर्व एत आत्मनो व्युच्चरंतीति श्रुतिः प्रतिशरीरमात्मनो भेदं विना प्रतिशरीरव्यवस्थितसुखदुःखादिभोगस्यानुपपत्तेश्च प्र

सदासंविद्रूपाः इयसुखघनात्मा भगवती त्वमत्र क्षेत्रज्ञा बहुविधतनूभिर्बहुविधा॥
विभास्युद्धाराय स्वयमहह नोयस्य वपुषा पुनासि त्वं गंगे निखिलजनतां पुण्यनिवहे।२६॥

तिशरीरमात्मानो भिन्ना एवेति वक्तुं शक्यं तथापि एको देवः सर्वभूतेषु गूढ इत्यादि श्रुति विरोधेन प्रत्यक्षस्याप्रमाणत्वात् सर्व एत आत्मान इति श्रुतेस्तु भेदोपमर्दैनैकात्म्यप्रतिपादनाय भेदानुवादत्वात् भोगव्यवस्थाया अंतःकरणभेदेनोपपत्तेर्न प्रतिशरीरमात्मानो भिन्ना इति भावः॥ ॥इति ऐक्यात्मनिरूपणप्रकरणम्॥ २६॥ ॥२६॥

समुत्थमिति॥भो सुरसरित् एतत्ते अपूर्वं कृत्यं विजयते एतत् किं मायायां सरसि समुत्थं इदं जगतीपंकजं यच्चास्मिन्सुकृतादिसौरभ्यं अथ सौंदर्यं प्रियत्वं महे
च्छापत्रं तत्कमलं चिद्भानुस्त्वमनिशं विकचयसि विकसयसि प्रकाशयसीति यावत् प्रतिभासगात्रशरीरायां मायायां सरसि व्यवहारक्षमं जगत्कमलं
यच्चासोपादेयं रूपं प्रतिभानं चानिशं तत्स्वप्रकाशत्वदधीनमेवमथा प्रसिद्धकमलस्य प्रसिद्धसरसिजातस्य विकसनसौगंध्यादि स्वप्रकाशसूर्याधीन
तद्वदिति भावः यद्यथात्मानः स्वप्रकाशः मामहं जानामीत्यहं प्रत्ययग्राह्यत्वादिति वचनं शंक्यं तथापि सुप्तोत्थितस्य सुखमहमस्वाप्समिति परामर्शा
नुमितसौषुप्तानुभवात् आत्मा स्वप्रकाशः प्रकाशाव्यभिचारित्वात् प्रदीपापि वदित्यनुमानात् आत्मैवास्य ज्योतिर्भवतीत्यादिश्रुतेश्च स्व

समुत्थं मायायां सरसि जगतीपंकजमिदं यदस्मिन्सौरभ्यं सुकृतमुखतोऽथो सुभगता॥
महाशापत्रं यद्विकचयसि चिद्भानुरनिशं तदेतत्ते कृत्यं सुरसरिदपूर्वं विजयते।२७।

प्रकाश आत्मा मामहं जानामीति प्रत्यक्षं तु स्वप्ने स्वशिरःछेदादिप्रतीतिवद्भ्रान्तिरेव स्वप्रकाशत्वं चाऽर्कान्यनिमित्तप्रकाशत्वं तेन प्रदीपादेः संवेद्य
त्वेपि न साध्यविकलतानवाविद्यमानस्य कदाचिदनुपलंभे पि साधनविकलता न च तत्स्वघात्मा संवेद्यः प्रकाशाव्यभिचारित्वात् प्रदीपवदित्येवा
नुमीयतामिति शंक्यं अप्रयोजकत्वात्तन्न खलु प्रकाशाव्यभिचारित्वात् प्रदीपादेः संवेद्यत्वं किं त्वनात्मत्वात्तन्न च तुल्यमप्रयोजकत्वं प्रदीपादेर्न प्रका
शाव्यभिचारित्वात् स्वयंप्रकाशत्वं किं तु तेजोद्रव्यत्वादिति शंक्यं पार्थिवस्यापि पद्मरागादेः स्वत एव तमोविरोधित्वदर्शनादिति संक्षेपः॥ ॥

॥ इति स्वप्रकाशत्वप्रकरणम्।२७।

त्वमेवासीति। भोसुरधुनि पश्यत्स्वचक्षुरित्यादिश्रुतिप्रमाणादत्र क्षपिचक्षुरादिंद्रियरहितापि परमानंदलहरी ज्ञानावत्त्वविचक्षणानिखिलजगतोद्रष्ट्री पुरुषरूपा पित्वमेवासितथा स्यागमापायिजगतोऽवधिरनुगता च त्वमसित्वमसाक्षिण्याज्ञानरूपेणनिखिलमिदं साक्षं स्फुरतितेनपरंरूपं श्रुतिम्रृतेवामपितुंवोधयितुंकोवा अलंसमर्थइत्यन्वयः॥ अत्र द्रष्ट्रीत्यनेनदृग्दृश्यान्वयव्यतिरेकः त्वमेवं साक्षिणीत्यनेन साक्षिसाक्ष्यान्वयव्यतिरेकः अवधिरित्यनेनागमापायितदवध्यन्वयव्यतिरेकः परमानंदलहरीत्यनेन दुःखिप्रेमास्पदान्वयव्यतिरेकः अनुप्रयातेत्यनेनानुवृत्तव्यावृत्तान्वयव्यतिरेकश्चपंचमस्तद्द्योतोपायः सूचितः तत्र दृशिदृश्याणामन्वयेनारोपिततादात्म्येनव्यतिरेको मिथ्यात्वंदृग्दृश्यान्वयव्यतिरेकः॥ एवं साक्षिणि साक्ष्यस्यान्वयेनव्यतिरेकः॥ तथागमापायिनस्तदवध्यौवाधकयव्यतिरेकः॥ तथादुःखिनः परमप्रेमास्पदेऽन्वयेनव्यतिरेकः॥ तथाऽनुवृत्ते व्यावृत्तस्यान्वयेनव्यतिरेक इति क्रमशो बोध्याः॥ एवंविधान्वयव्यतिरेकैर्गम्यं यत्तत्वंब्रह्मकूटस्थसाक्षिशब्दाद्यभिधेयंमात्वमसीतिपावत् अयंभावः॥ यद्यपि प्रमात्रादिचतुष्टयेनैवसर्वव्यवहारसंभवात्साक्षिणं

त्वमेवासिदृष्ट्री निखिलजगतोस्यावधिरनुप्रयातानक्षापित्वमसि परमानंदलहरी॥ त्वयेदं साक्षिण्या स्फुरतिनिखिलं मा क्षयमयंतेपरंरूपंकोवागमपितुमलंहि श्रुतिमृते॥ २८॥ वियद्व्याप्येदं निखिलजगदस्येवसततंत्यनंताखंडात्मानिरवधि चिदानंदजलधिः॥ अंशोयास्त्वय्येवामरधुनिविशेषाअविरतंलभंतेसंस्थानंत्वमिति परमात्मैवजननि। २९। ॥

विनाऽनुपपत्त्यभावात्तत्प्रमात्रव्यतिरिक्तः साक्षी स्वीकर्तुमनुचितस्तथापि प्रमातृव्यतिरिक्तसाक्षीपरैरनिच्छद्भिरप्यवश्यंपमभ्युपगंतव्य .... इति भावः॥ इति साक्षिस्वरूपनिरूपणप्रकरणम्॥ २८॥ वियद्व्याप्येति॥ भोसुरधुनि अनंताखंडात्मा निरवधि सदानंदजलधिस्त्वंइदं निखिलंजगत वियद्वत् आकाशवद्व्याप्य तिष्ठसि अतः अंशोयाविशेषाः पृथिव्यादयस्त्वय्येवस्थितिलभंतेरतिरेनोः हेजननि त्वंपरमात्मैवासीत्यन्वयः अयंभावः॥ यद्यप्युत्क्रांतिगत्यादिमत्वात्परिच्छिन्न एवात्मानसर्वगतः तत्रश्च परिच्छिन्नत्वेमतिमध्यमपरिमाणस्य सावयवत्वादिदोषप्रसंगात् आत्मनश्च नित्यत्वात् अणुपरिमाण एववालाग्रशतभागस्य शतधाकल्पितस्य च भागोजीवः सविज्ञेयइत्यादिश्रुतेः ज्यायानाकाशात् आकाशवत्सर्वगतश्च इत्यादिश्रुतयस्तु परमात्मविषया इति वक्तुंशक्यं तथापि आकाशवन्नित्य इत्यवद्व्यत्वेनाकाशवत्सर्वगतश्चात्मानमणुपरमाणुत्वेनैकांतिकता परमाणुनामप्रामाणिकत्वात् किंचतत्वमस्याद्यभेदश्रुतेः औस्सेवाधस्तादात्मोपरिष्टादित्यादिसा

गं॰ल॰
१५

15

जगन्नद्यामिति ॥ भो सुरधुनि जगन्नद्यां कीटाद्‌वजननधारासु पतिता जीवाः कथंचिद्गुरुकृपया त्वबालंबवशातः सद्बुद्ध्या परब्रह्माभिन्नां स्वात्मसुखतां
प्राप्य संसारपाशान्मुक्ता भवंतीत्यर्थः ॥ अयंभावः ॥ यद्यप्यहं सुखीति सुखात्मनोर्भेदप्रतीतेः सुखमिहमित्यभेदाप्रतीतेश्चान सुखस्वरूपः आत्म
न्युपलभ्यमानेप्यनुपलभ्यमानत्वाच्चेति वक्तुंशक्यं तथापि आत्मैवानंदः आनंद आत्मा यो वै भूमा तत्सुखमित्यादिश्रुतेः आत्मा आनंदरूपः नि
रुपधिप्रेमास्पदत्वात् सुखवदित्यनुमानाच्चात्मा सुखस्वभावोऽभ्युपेयो तेन च प्रेमास्पदत्वमसिद्धं मा न भूवं भूयासमित्यात्मविषयाशीर्विशे
षस्य दृश्यमानत्वात् तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्माद्यदयमात्मेति श्रुतेश्च न च तथापि निरुपधिप्रेमास्पदत्वमसिद्धं आत्मनो

जगन्नद्यां कीटाद्‌वजननधारासु पतिताः कथंचित्सद्बुद्ध्या गुरुकरुणया स्वात्मसुखताम् ॥
परब्रह्माभिन्नामनुभूतरहस्याप्य जगतीमहापाशान्मुक्ताः सुरधुनि तवालंबवशतः ॥३०॥

पि सुखार्थत्वादिति चेन्नैवं सुखं पुरुषार्थं नात्मसुखार्थः अन्यथा सुखस्य तत्साधनस्य चापुरुषार्थत्वात् तदर्थं पुरुषप्रयत्नो न भवेत् न च तर्हि
सुखस्यान्यार्थत्वान्निरुपधिप्रेमास्पदत्वासाधनविकलो दृष्टांत इति वाच्यं तस्यापि परमार्थतोऽन्यार्थत्वाभावात् अध्यासनिमित्तत्वाद
न्यार्थप्रतिभासस्य सुखात्मनोर्भेदस्याभ्यासमूलत्वात् तस्मादात्मा सुखस्वरूप इति सिद्धम् न चाहं सुखीत्यादिप्रतीतिविरोधः तासां भ्रमा
त्व चेतन्ने स्वाध्यस्तांतःकरणधर्मवृत्तिविषयत्वात् सिद्धांते ज्ञानसुखादिवृत्तीनामंतःकरणधर्मत्वात् अत एव नाहं सुखमित्यधिकमा
करे ॥ इत्यात्मनः सुखस्वरूपताप्रकरणम् ॥३०॥

अलेपइतिमो स्वरधुनि परा ऽ विद्या मूला ज्ञानं यस्मिन् अलेपे चिदानंदविभवे कर्तृत्वमुखतः अध्यासं तनुते विद्यया अधिगतं ज्ञातं निजरूपं कर्तृत्वरूपं यया ईदृशी अतस्त्वां अमृतरसदां सेवे इत्यन्वयः॥ अयं भावः॥ यद्यप्यात्मनि कर्तृत्वादिसंसारस्य प्रतीयमानत्वात् प्रतीतिश्च स्वतः प्रामाण्यात् कारणदोषबाधकप्रत्ययानुपलंभात् प्रमाणप्रतीतस्यैव परमार्थत्वात् आत्मनि संसारः परमार्थः किं च यदि परमार्थो न भवेत् तदेष्टानिष्टपरिहाराद्देशेन साधनविधायि शास्त्रप्रमाणं स्यात् रज्जुरूपे सं निवृत्तये मणिमंत्राद्युपदेशाभावादिति वक्तुं शक्यं तथाप्यध्यासमंतरेणात्मनि सुख

अलेपयस्मिन्वै निरवधिचिदानंदविभवे परा ऽ विद्याध्यासं तनुत इह कर्तृत्वमुखतः॥
तदेव त्वं विद्याधिगत निजरूपा भगवती ततस्त्वां सेवे ऽ मृतरसपदां स्वैस्वर धुनि॥३१॥

दुःखकर्तृत्वादिसंबंधस्यानिर्वचनात् पारमार्थिकत्वे मोक्षानुपपत्तेः स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययमात्मा तत्त्वमसीत्यादिश्रुतिप्रतिषिद्धत्वाच्चात्मनि संसारो न पारमार्थिकः किं तु विद्याविजृंभित एव मृगतृष्णोदकसमुद्रसमुद्भूतवीचीतरंगवत् न च साधनविधायि शास्त्रमनर्थकं ब्रह्मात्मबोधात् प्राक् भ्रांतपुरुषाभिप्रायमनुसृत्य साधनविधानात्॥ इति कर्तृत्वादिबंधमिथ्यात्वम्॥३१॥

जननिमिति॥ भो सुरनदि श्रुतिवनितया दीनं जनं दृष्ट्वा कृपया जनैः कण्ठस्थिता मुक्तामणिरिव यस्य संभ्रमाद् अखिलहृदयेषु गूढं प्रत्यक्त्वेनादर्शि द
र्शितं तदेव त्वं परं। अविरतं स्मृतिपथं गतास्याः भूयाः इत्यन्वयः॥ अयं भावः॥ यद्यपि जीवो नाम कार्यकारणसंघाताभिमानी धर्माधर्मवान् प
रिच्छिन्नज्ञानशक्तिरत्यंतपराधीनः ईश्वरः पुनः कार्यकारणाभिमानरहितो धर्माधर्मातीतो निरतिशयज्ञानसंपन्नोऽपरतंत्रस्तत्श्च वि

जनं दीनं दृष्ट्वा श्रुतिवनितया दर्शितकृपया स्थितः कंठे मुक्तामणिरिव जनैर्ब्रह्मपदिह॥
परं प्रत्यक्त्वेनाखिलहृदयगूढं सुखमरं तदेव त्वं गंगे स्मृतिपथगता स्या अविरतम्॥ ३२॥

रुद्धस्वभावयोः कथमपि नाभेदो युक्त इति तत्त्वमाद्युक्तिर्गौणीति वक्तुं शक्यं तथापि विरुद्धानां मृषात्वात् तत्र प्रयुक्तभेदस्यापि तथात्वात् त
योर्न्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मि न स वेदेत्यादिना निंदनाच्च न तत्त्वमाद्युक्तिर्गौणी तस्मादेकत्वप्रतिपादिकाः श्रुतयोऽद्वितीयवस्तु
पर्यवसायिन्य एवेति तद्विरोधाद्भेदप्रतीतेर्भेदश्रुतीनां चाविद्यकविषयत्वमेवात एव न भेदाभेदश्रुतिबलाद्भेदाभेदावपीत्यधिकमाकरे॥
॥३२॥ ॥इति जीवब्रह्मैकत्वप्रकरणम्॥ ३२॥

यदाभासमिति॥ भोः अनघे गंगे जननि केपि जीवं यत्तस्य आभासं अविदन् अपरे प्रतिबिंबं परे च अवच्छेदं परे इह त्वं दृष्टिं सृष्टिं अविदन् तदेव त्वं समस्तानुस्मृता जीवभगद्दि
कल्पैर्विरहिता भवशर्मार्थं संसारस्य सुखार्थं इह भवसि व्यक्तमसीत्यन्वयः॥ अयं भावः॥ यद्यपि मूर्त्तद्रव्यस्य सरूपस्यैव मूर्त्तान्तरे स्वच्छद्रव्ये प्रतिबिंबभावो दृष्टः ब्रह्म
णः पुनरमूर्त्तत्वान्नीरूपत्वात् सर्वगतत्वादद्वितीयत्वाच्च न प्रतिबिंबाभासौ संभवतः नाप्यवच्छेदः अद्वितीयत्वात् न च मायया अवच्छेदः तस्या अवस्तुत्वात् नाप्यंतः
करणेन तस्य संसार्युपाधित्वात् एवं न दृष्टिः सृष्टिः नित्यदृष्टेः सृष्टित्वे सर्वदा सृष्ट्यापत्तेः दृश्ये दृष्टेः सृष्टित्वे ब्रह्मणोपि सृज्यत्वापत्तेस्तस्माच्चत्वारोपि वादा
नयुक्त इति चेत् उच्यते यथाप्यमूर्त्तस्य नीरूपाकाशस्य जले प्रतिबिंबदर्शनात् यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियते भेद
रूपो देवः क्षेत्रेष्वेवमजोयमात्मेत्यादिश्रुतेश्च ब्रह्मणः प्रतिबिंबाभासयोः संभवात् मायाया अवस्तुत्वेपि संसारबीजरूपायाः अभावविलक्षणत्वरूपवस्तुत्व
रूपवस्तुत्वात् अंतःकरणस्य संसार्युपाधित्वेपि मायाद्वारा ब्रह्मणापि संबंधात्ताभ्यामवच्छेदस्यापि संभवात् अविरोधोपहितदृष्टेः सृष्टिप्रारंभकत्वेनैरेव वा सृष्टि

यदाभासं जीवं जननि प्रतिबिंबं तमपरे परे चावच्छेदं परे इह दृशं सृष्टिमविदन्॥
तमस्तानुस्मृतामतमपि विकल्पैर्विरहितां तदेव त्वं गंगे भवसि भवशर्मार्थमनघे ३३

त्वेन दृष्टिसृष्ट्यापत्युक्तदोषासंभवाच्चत्वारोपि वादा युक्ता एवेति॥ तत्राभासवादो मायाभासेन जीवेशौ करोतीत्यादिश्रुतिबलाद्वार्त्तिककाराणां प्रतिबिंब
वादो रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणायेत्यादिश्रुतिबलाद्विवरणकाराणां अवच्छेदवादो घटसंवृत्तमाकाशं नीयमाने यथा घटे॥ घटो नीयेत
नाकाशं तद्वज्जीवो नभोपम इत्यादिश्रुतिबलाद्वाचस्पतिमिश्राणां दृष्टिसृष्टिर्भाष्यकारीयाणां इदं सर्वं दृष्ट्वेत्यादिश्रुतिबलात् न च सिद्धविकल्पायोगात्पर
स्परविरुद्धानां प्रमाणं दुर्घटं अद्वैतप्रतिपत्त्युपयोगितया अधिकारिभेदेन सर्वमाप्यसंभवात् तदुक्तं यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि। सा सैव प्रक्रियेह
स्यात्साध्वी सा चानवस्थितेति॥ तत्राभासो नाम दर्पणांतर्गतमुखवदनिर्वाच्यश्चिदाभासो बिंबातिरिक्त एव प्रतिबिंबो नाम उपाध्यंतर्गतस्वरूपारोपितधर्मवान्बिं
व एव सत्यः अवच्छेदो नाम महाकाशस्य घटाकाशवदेकदेशोंशो विच्छिन्न यावत् दृष्टिसृष्टिर्नाम दृष्टिरेव सृष्टिः प्रतिभासमात्रशरीरा ज्ञानोपहिता चिज्जीवं
इदं सर्वं प्रतिभासिकमितियावत्॥ इत्यादिनिरूपणप्रकरणम् ३३

17

नसत्त्वासत्त्वाभ्यामिति॥ सत्त्वासत्त्वाभ्यां गदितुमप्यशक्या एषा माया त्वत्सदृशी प्रपंचस्य व्यक्तिं तनुते यं परं पुरुषं प्राप्य द्राक् कुशीघ्रं मंदाक्षं यथा स्यात्तथा पसरती त्यहह आश्चर्यं लोके हि स्त्री पुरुषं प्राप्य लज्जति इयं पुरुषं प्राप्यापसरती साश्चर्यमनिर्वाच्येति यावत् त्वत्सदृशी त्व जनीति कथनादनादिभावत्वमपीति भावः स्मृतिप्रामात्वप्रभृतं तु त्वविधात्री त्यन्वयः मायात्राज्ञानं यद्यप्यहमज्ञ इत्यादिप्रतीती नोज्ञानप्रतिषेधरूपतया ज्ञानविशेषप्रागभावध्वंसविषयत्वोपपत्तेः अज्ञानेनावृतं मिथ्यादिस्मृतीनां मिथ्याज्ञानजवासनाविषयत्वेनोपपत्तेर्नानादिभावरूपाज्ञाने किंचित्प्रमाणमिति वक्तुं शक्यं तथापि मूढोहं न जानामीत्यनुल्लिखितविषयविशेषस्याप्यज्ञानस्याप्यनुभवाद्धि विशेषाभावस्य वक्तुमशक्यत्वात् धर्मिप्रति

न सत्त्वासत्त्वाभ्यां गदितुमपि शक्या त्वत्सदृशी प्रपंचस्य व्यक्तिं तनुत इह माया सुखघनम्॥
परं यं प्राप्य द्रागपसरति मंदाक्षमहह तदेव त्वं गंगे मतमस्तु त्वविधात्री स्मृतिमिता॥ ३४॥

योगिज्ञानाज्ञानभ्यां व्याप्यातापत्तेः सामान्याभावस्यापि वक्तुमशक्यत्वात् तदेवात्मशक्तिं स्वगुणैर्निगूढामिति गुणवत्त्वश्रुतेश्च मायां तु प्रकृतिं विद्यात् मायाचाविद्या च स्वयमेव भवति अनृतेन हि प्रत्यूढानीहारेण प्रावृता इत्यादिश्रुतिभिश्च मायाविद्यादिशब्दव्यपदेश्यं तत्त्वज्ञाननिवर्त्यमनादिभावरूपाज्ञानं ज्ञानपर्युदासेनाज्ञानशब्देनोच्यमानमभ्युपेयते तच्च न सत् बाधात् नाप्यसत् प्रतीयमानत्वात् नापि सदसत् विरोधात् तस्मात् सदसद्विलक्षणमनिर्वाच्यमेवेति भावः॥ ॥इत्यज्ञानस्य भावत्वनिरूपणम्॥ ३४ ॥

विभागेनेति ।। भो स्तुरतटिदेवनदि श्रुतिवपुस्त्वं स्तजिस्थैः स्तष्टिविषयैर्वचनैर्भावं अपि च नेह नानास्तीत्युचितवचनैर्हि निश्चयेनाभावं अवगमयती
वोधयंती भावेन तात्पर्येण चिदात्मानं गदती अमरखर निषेव्यांघ्रिकमलात्मस्वरूपासीत्यन्वयः ।। अयं भावः ।। यद्यपि भूतले घटो नास्तीत्यादि
प्रतीतिः केवलभूतलाद्यधिकरणविषयैव न तत्त्वांतरविषया भूतलविषयविज्ञानव्यतिरेकेणाभावविषयप्रतीतेरदर्शनादिति वक्तुं शक्यं
तथापि नाभावाख्यतत्त्वांतरमपलपितुं शक्यं तच्छब्दप्रत्यययोर्निरालंबनत्वप्रसंगात् न च तौ भूतलमात्रविषयाविति वक्तुं शक्यं तर्हि भा

विभागेनाभावं त्ववगमयती भावमपि च स्तजिस्थैर्नानाने स्तुचितवचनैश्च श्रुतिवपुः ।।
चिदात्मानं शश्वत्स्तुरतटिनि भावेन गदती त्वमस्यात्मासि व्या ऽमरखरनिषेव्यांघ्रिकमला ३५

वग्रारभस्य यावपि घटविषये तथैव स्यातां तस्माद्भूतले घटो नास्तीति व्यवहारो भूतलमात्रालंबनो न भवति भूतले वस्त्वंतरप्रतियोगिक
व्यवहारत्वात् घटव्यवहारवदित्यनुमानात् नेह नानास्तीत्यादिश्रुतेस्तत्त्वांतरं विना मोक्षनिर्वचनानुपपत्तेश्च भाववदभावोपि
तत्त्वांतरं न च द्वैतश्रुतेर्भावाद्वैताभिप्रायत्वात् परमार्थसदेकाभिप्रायत्वाद्वेत्यधिकमाकरे ।। ।। इत्यभावनिरूपणम् ।। ३५ ।।

ग॰ ल॰
१८

सदेवासीदिति॥ भोजन्हुतनये सदेवासीदग्रइतिश्रुतिः पुराकार्योत्पत्तेः प्राक् कार्यविषयं सत्त्वं सद्भावं जगौ तस्मादसतोः सद्वादस्याप
गतेर्निरासात् हि निश्चयेनावगतं यस्परं ब्रह्मतत्त्वं निखिलशरण्यं ये त्वां नतिवं ते ते सद्गतिजुषः कथं भवन्तीत्यहहेति खेदे इत्यन्वयः॥ अयं भावः॥
यद्यपि कार्यं प्रागुत्पत्तेरसदेव कारणस्योपलंभेप्यनुपलभ्यमानत्वात् सत्त्वे हि स्वकारणेन मृदादिनोपलभ्यमानेन सहैवोपलभ्येत न
चोपलभ्यते किं च जन्मनः प्राक् कार्यसत्त्वे कुलालादिकारकव्यापारवैयर्थ्यं स्यात् न चाभिव्यक्तये कारकव्यापारेण सत्त्वायेति वा

सदेवासीदग्रश्रुतिरिति जगौ कार्यविषयं पुरा सत्त्वं तस्मादसदपगतेर्यद्ध्यवगतम्॥
परं ब्रह्मत्वं तन्निखिलशरण्यं जह्नुतनये न यत्त्वां सेवंते कथमहह ते सद्गतिजुषः॥३६॥

च्यम् अभिव्यक्तेरपि सदसद्विकल्पग्रासात् तस्मादसदेव कार्यमिति वक्तुं शक्यं तथापि नोत्पत्तेः प्रागसत्कार्यं अनुत्पत्तिप्रसंगात्
असतो घटादेः कारणेन संबंधासंभवात् संबंधस्य संबंधिनिरूप्यत्वात् तस्मात्सदेव कार्यं न च कारकव्यापारवैयर्थ्यं अभिव्यक्त्यर्थत्
त्वात् न च व्यवहारोपयोगित्वं अभिव्यंजकसामग्र्यां तत्र जके न मणेरिव तमसः प्रतिबंधाद्व्यवहाराक्षमत्वमिति सामग्र्या अत्रैजक
त्वमात्रांगीकारादटोषात्॥ इति सत्कार्यवादः नि॰

नरस्येति ॥ भो श्रीगंगे विकार्ये देहादेर्दृश्यस्य घटादाविव क्वचिदपि द्रष्टृत्वं भवेत् अथ च दृशि चिद्रूपे द्रष्टरि दृग्विषयता दृश्यत्वं न चैव भवेत् सुमन
सः शुद्धधियः कृत्स्नायुक्त्यानुभवबलतः त्वां परां चितिं विविंसत्व यि सादरतरा भवंतीति शेषेणार्थः ॥ अयं भावः यद्यपि गौरोहं जानामीति
गौरत्वज्ञानवत्त्वयोः सामानाधिकरण्यग्रहाद्देह एवात्मा सत्यपि देहात्मनोरभेदे मम शरीरमिति भेदप्रत्ययस्तु मम आत्मेतिवदौपचारिकः
न चैवं देहेऽहंप्रत्ययोऽपि पुत्र इवौपचारिकः मनुष्योऽहमिति मनुष्यशब्दस्य जातिमात्रवाचित्वात् जातिशब्दानुविद्धयस्य च व्यक्तेर्मुख्य

न दृश्ये द्रष्टृत्वं क्वचिदपि घटादाविव भवेद्विकारे देहादौ दृशि न च भवेद्दृग्विषयता ॥
चितिं कृत्स्नायुक्त्यानुभवबलतस्त्वां परतरे विविंसत्व श्रीगंगे त्वयि सुमनसः सादरतमाः ॥ ३७

त्वसिद्धेर्गौरितिवन्मुख्य एव देहेऽहंप्रत्यय इति वक्तुं शक्यं तथाप्यहंप्रत्ययो देहे आध्यासिकः न वस्तुभूतः अहंप्रत्ययस्य ज्ञानवत्तिवा
स्तत्वप्रसिद्धेः ज्ञानस्य देहधर्मत्वानुपपत्तेः देहस्य घटकदौक्तिकतया चैतन्याभावात् तस्माद्देहस्य द्रष्टृत्वाभावाद्देहातिरिक्त एवा
त्मा न देहो दृश्यत्वात् तत्रोऽहंप्रत्ययोऽध्यास एव न चात्र भ्रमितव्यम् गौरोऽहंप्रत्ययो नाध्यास इति गौरत्वज्ञानभेदयोरेकत्वावभा
सः यथा सिंहो देवदत्त इति अध्यासो नाम अज्ञातभेदयोरेकत्वावभासः न चाहमिति व्यतिरिक्तविषयः विचारसाध्यत्वाद्व्यतिरेकस्ये
त्यधिकमाकरे ॥ ३७ ॥ ॥ इति देहात्मवादनिरासप्रकरणम् ॥ ३७ ॥

गं.ल.
१९

19

स्थिरात्वमिति॥ भोजननिगंगेपः कश्चित्सुकृती स्थिरात्वं स्थिरं द्रष्टुं यं पश्यसि विषयीकरोषि इति अनुदिनं भावयति स तवकारुण्यावज्ञातः स्थिरतरस्वरूपं मोक्षमाप्नो भवेदित्यन्वयः॥ अयं भावः॥ यद्यपि घटादयः क्षणिकाः सत्त्वात् व्यतिरेके गगनकुसुमवदित्यनुमानात् घटादेः क्षणिकत्वं वक्तुं शक्यं तथापि तत्त्वमुक्तं सोयमिति प्रत्यभिज्ञाविरोधात् न च प्रत्यभिज्ञान प्रमाणं संस्कारजन्यत्वेन स्मृत्यक्षान्तर्भावात् व्याप्तिज्ञानजन्यत्वाद्यभावान्नानुमानादिति वाच्यम्· संयोगजन्यत्वादपरोक्षविषयत्वाच्च प्रत्यक्षेऽन्तर्भवसंभवादित्यधिकमाकरे॥ इति क्षणभंगनिरासप्रकरणम्

स्थिरात्वं चैतन्यामृतरसपदा द्रष्टुमपि च स्थिरं पश्यस्येवं सनुदिनमिदं भावयति यः॥ कृतिकश्चिद्भूयः स्थिरतरसुखं

चामृतपदं भवेत्प्राप्तो गंगे जननि तवकारुण्यवज्ञातः॥ ३८॥ जडत्वं कार्यत्वं परिमितिपृथं नात्र भवती श्रयंस्यवक्ता

पिक्षणिकपदवीनक्षणमपि॥ स्थिरातश्चिद्रूपा भवसि भवपारं श्रुतिगिरा जुषन्ते गंगे त्वां सुरनरधुरीणाः सुकृति

माश्रुणा॥ जडत्वमिति॥ भो अंब गंगे अत्र भवती पूज्या त्वं जडत्वं कार्यत्वं परिमितिपृथं परिमितित्वं क्षणमपि क्षणिकपदवी न श्रयसि क्षणमपीत्यनेने क्षणिकमपि तन्नेति सूचितम् अतः श्रुतिगिरा स्थिराचिद्रूपा त्वं भवसि सुरनरश्रेष्ठाः सुकृतिनः संसारपाररूपां त्वां सेवत इत्यन्वयः॥ अयं भावः॥ यद्यपि संविस्वेधावभिन्नौ सहोपलंभनियमात् यावभिन्नौ न भवतः न तौ सहोपलंभनियमौ यथा नीलपीतौ अहं घटं जानामीत्यादिभेदप्रत्ययस्तु अनादिवासनाबलादभेदेन प्रत्यक्षविरोधाच्च न संविस्संवेद्ययोरभेदः नापि विज्ञानानां क्षणिकत्वं मानाभावात् तच्च रसं वित्कालेपूर्वसंविदोऽनुपपत्तेः क्षणिकत्वमिति चन्नैतत्साधुजन्मविनाशासिद्धेः पूर्वोत्तरभावसिद्धिः पूर्वोत्तरभावसिद्धौ च जन्मविनाशसिद्धिरिति परस्पराश्रयप्रसंगात्॥ इति विज्ञानवादनिराक

१९

करोषीति॥ भो अंब मायावृत्तचितितनुः स्त्वं गुणतनुः एतद्दृश्यं करोषि पासि संहारपदवीं तपसि यत् यतः अतस्त्वमेव गुरोस्सकाशात् ज्ञातामर्त्या
नमृतपदवीं नयसीत्यन्वयः॥ अयं भावः॥ यद्यपि अहमज्ञ इत्यज्ञानस्य जीवाश्रयत्वप्रत्यक्षात् ब्रह्म न जानामीति ब्रह्मविषयत्वप्रत्यक्षा
त् सर्वज्ञातया ब्रह्मण्यज्ञानयोगाच्च ब्रह्मविषयं जीवाश्रयमेवाज्ञानं ततश्च जीवाश्रयस्य ब्रह्मविषयस्याज्ञानस्य निवृत्तये जीवस्य ब्रह्मोपदेशो
युक्तः अन्यथा ब्रह्माश्रयाज्ञानस्य जीवविषयत्वे ब्रह्मणो जीवोपदेशविषयं शास्त्रमिति वैपरीत्यमापद्येत तस्मान्न ब्रह्माश्रयमज्ञानमि

करोषि त्वं पासि क्रमत उत संहारपदवीं नमस्येतद्दृश्यं सगुणतनुरेवं त्वमसि यत्॥
त्वमेवातो मायावृतचितितनुर्जन्तुनये गुरोर्ज्ञातामर्त्यानमृतपदवीं प्रापयसि च ४०।

ति वक्तुं शक्यं तथापि परमार्थवस्तुन एव कल्पनाधिष्ठानत्वात् ब्रह्मण एव च परमार्थवस्तुत्वाद् ब्रह्माश्रितमेवाज्ञानं कल्प्यते अहमज्ञ इति तु चेत
न्यः अहंकाराज्ञानयोः सामानाधिकरण्यात् न च ब्रह्मण्यज्ञानाभ्युपगमे सर्वज्ञत्वविरोधः तदाश्रयत्वस्य सर्वज्ञत्वसाधकत्वात् अविद्याश्र
यत्वं विना तत्परिकल्पितप्रपंचज्ञत्वानुपपत्तेस्तस्माद् ब्रह्मैव स्वाश्रयाज्ञानात् संसरतीत्युच्यते चेत्सु उपदेशोपि तस्यैवेत्यधिकमाकरे॥
इति ब्रह्माश्रयाज्ञाननिरूपणम्॥ ४०॥

गं. ल.
२०

अथेच्छांतादान्ता इति॥ अथेत्यनुश्चनिःशान्तादान्ता विषयविमुखाः दोषहीनाः त्रिविधभक्ताः श्रवणादिपरायं सुखघनपरात्मानमखंडमनंतं ब्रह्मवि
बुध्य विमुक्ताविद्यास्तत्करुणाब्धिस्त्वमसीत्यन्वयः॥ अयं भावः॥ यद्यप्यज्ञाननिवृत्तिरात्मभिन्ना सती द्वैतप्रसंगात्तथाप्यभिन्नाज्ञानसाध्यत्वा
नुपपत्तेः आत्मनो नित्यसिद्धत्वाज्ज्ञानस्य नित्यनिवृत्तेस्तन्निमित्तः संसारः प्रतिभासश्च न स्यात्तथाप्यसती तर्हि हेतत्स्वतियोगिनोऽज्ञानस्य सत्यत्वप्र
संगः लोके घटादिषु तथादर्शनात्तथापि सदसती तथाविधवस्तुनोऽदर्शनात् तथा च तस्या अनिर्वचनात्तत्तदर्थे पुरुषप्रवृत्त्युपपत्तिरिति वक्तुं त्रा
क्यं तथापि यस्मिन्सति यस्याग्रिमक्षणसंबंधः असति यस्मिन्यस्याभावस्तत्तत्साध्यमिति साध्यलक्षणास्य ज्ञाने सत्यज्ञाननिवृत्तिरूपात्म

अथेच्छांतादांता विषयविमुखा दोषरहिताः त्रिविधभक्ताः सम्यक्श्रवणमनननध्यानसहिताः॥
विबुध्यात्मानं यं सुखघनमखंडं परतरं विमुक्ताविद्यास्तत्त्वमसि करुणाब्धिः सुरधुनिः॥४१॥

नोऽग्रिमक्षणसंबंधः ज्ञानाभावेऽज्ञाननिवृत्त्यभावे ज्ञानमिति अज्ञाननिवृत्तिरूपात्मन्यपि सत्त्वोपपत्तेर्भिन्नसत्ताकयोर्भावाभावयोर्विरोधा
भावाच्च नित्यसिद्धायामप्यज्ञाननिवृत्तौ साध्यत्वभ्रांत्या वा पुरुषप्रवृत्त्युपपत्तेर्न काचिदनुपपत्तिः वस्तुतो विरोधिब्रह्मज्ञानरूपेव सा
न च तत्रापि सदसद्विकल्पः तस्याः सर्वेऽपि तदुपलक्षितब्रह्मात्मा वा परः पुमर्थस्तेनादोषादिस्यधिकमस्मत्कृताद्वैतवादावल्याम्॥ ॥इति
ज्ञाननिवृत्तिनिरूपणम्॥४१॥

20

२०

अन्त्रे षेरिति।।भोजन्तुतनयेपुण्यानांपटलीन्येवकरणानिसाधनानितेरन्त्रेषेः शुद्धंतःकरणः असोचरमजन्मानरःअखण्डार्थेशुद्धेजिज्ञासांप्राप्नुते
विविदिषंतियज्ञेनेत्यादिश्रुतेःअसोअखण्डार्थस्त्वमेवअतःसर्वेसुरनरास्त्वयिप्रीतिमनसःप्रीतियुक्ताइत्यन्वयः।।अयंभावःयद्यपिनिषिद्धानांदुरि
तफलत्वात्अभ्युदयफलत्वाच्चकाम्यानांपारिशेष्यन्यायेनसाधनसाकांक्षस्यमोक्षस्यानुपलभ्यमानफलांतरंनित्यनैमित्तिकंकर्मसाधनत्वेन
संवध्यतेयदिचाग्निहोत्रादिकर्मव्यतिरेकेणापवर्गमुद्दिश्यसाधनांतरंविधीयेततदाकुर्वन्नेवेहकर्माणीतियावज्जीवश्रुतिरुपरुध्येततस्मात्कर्मा
ण्येवमोक्षसाधनानिकर्मणैवहिसंसिद्धिमास्थिताजनकादयइतिस्मृतेश्च अथवाज्ञानान्नित्यादिकर्मसमुच्चितान्मोक्षोविद्यांचाविद्यांच

अन्त्रेषेःपुण्यानांपटलकरणैःशुद्धकरणेनरोऽसौजिज्ञासांचरमजननःप्राप्नुतइह।। अखंडार्थे
शुद्धेपरतरस्तुखेजन्तुतनयेत्वमेवासौतत्सर्वेत्वयिसुरनराःप्रीतिमनसः।।४२।। ।।४२।।

यत्तद्देहोभयंसहोक्तंतेःसोऽदितिवक्तुंवाक्यंतथापिमोक्षस्यकर्मजन्यत्वेस्वर्गादिवदनित्यत्वापत्तेःनकर्मणानप्रजयाधनेनेत्यादिश्रुत्याकर्मणोमोक्ष
साधनत्वप्रतिषेधात्कषाययक्तिःकर्माणिज्ञानंतुपरमागतिः।।कषायेकर्मभिःपक्वेततोज्ञानप्रवर्त्ततइत्यादिनांतःकरणशुद्धिसाधनत्वमात्राव
गमाच्चनकर्माणिमोक्षसाधनानिनचनकर्मणेत्यादिनिषेधःकेवलकर्मविषयोनसमुच्चितविषयइतिवाच्यंसमुच्चयेप्रमाणाभावात्।यत्तुनरु
क्तंविद्यांचाविद्यांचेतितन्नयुक्तंतत्रैवाविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुतइतिविद्याकर्मणोःफलभेदश्रवणात्भाभ्यामेवपक्षाभ्यांयथाखेपक्षि
णांगतिः।।तथैवज्ञानकर्मभ्यांप्राप्यतेब्रह्मशाश्वतीगतिरितिस्मृतेश्चेतितस्मात्कर्माण्यंतःकरणशुद्धिसाधनान्येवमोक्षोज्ञानदेवेत्यधिकमाकरे।।इतिज्ञा
उभाभ्यामेवेतिस्मृतिरपिकर्मणोऽध्यर्मध्यंसद्वारातत्त्वधीहेतुत्वाभिप्राया+५

परित्यज्येति॥ भो परमानंदलहरि गंगे एके मुनिवरा निरस्ता विद्यत्वान्मदमदनमोहादिरहिता अतो मुख्या मननशीलाः अर्थादेरभिलषितं अभिलाषं परित्यज्य यं परं अखंडं सुखघनं पश्यंति तत् त्वमसीत्यन्वयः॥ अयं भावः॥ यद्यप्येकाध्ययनविधिप्रयुक्तत्वात् सकलवेदाध्ययनस्य सकलवेदार्थविचारेप्येकाधिकारो युक्तः अध्ययनविधेश्चार्थबोधपर्यवसायित्वात् अर्थावबोधस्य विचारमंतरेणानुपपद्यमानत्वात् न चाध्ययनविधेरक्षरग्रहणमात्रपर्यवसानमवकल्प्यते अपुरुषार्थत्वात्तस्य किं चाध्ययनविधिर्यद्यक्षरग्रहणमात्रे पर्यवस्येत्तदार्थविचारस्य प्रयोजकाभावान्मीमांसाद्वयमनारभ्यं स्यात् तस्मादर्थविबोधपर्यंतोऽध्ययनविधिर्विचारमंतरेणानुपपद्यमानोऽध्ययनाधिकारिणं प्रति सकलवेदार्थविचारं प्रयुंक्त इति कर्मज्ञानकांडद्वय

परित्यज्यार्थादेरभिलषितमेके मुनिवरा निरस्ताविद्यत्वान्मदमदनमोहादिविमुखाः॥
परं यं संपश्यंत्यविरतमखंडं सुखघनं तदेव त्वं गंगे भवसि परमानंदलहरी॥ ४३॥

मेकाधिकारमिति वक्तुं शक्यं तथापि नैकाध्ययनविधिप्रयुक्तत्वाद्विचारस्यैकाधिकारत्वं अध्ययनविधेरक्षरग्रहणमात्रफलत्वादर्थविचारस्याध्ययनविधिप्रयोज्यत्वाभावात् कर्मविचारो ह्यग्निहोत्रादिविधिप्रयोज्यो ज्ञानविचारस्तु श्रवणादिविधिप्रयोज्य एव न चाक्षरग्रहणं निष्प्रयोजनमफलवदर्थविबोधहेतुत्वात् न च तर्हि अर्थावबोध एव फलमस्तु विधिस्वीकृताक्षरग्रहणफलत्वेन विधिफलत्वायोगात् अन्यथा स्वर्गस्येव पुरुषार्थतया फलत्वेकल्पनौचित्यात् तस्मान्नैकाधिकारं तद्द्वयकांडं किंतु कर्मणि विषयदोषादर्शी ज्ञाने तु विरक्तः सन्यास्येवाधिकारीत्यधिकमाकरे॥ ॥इति ज्ञानाधिकारनिरूपणम्॥ ४३॥

॥४३॥

21

विधिमिति ॥ भोगंगेनानाविधं फलंयस्य तन्नानाविधफलकं यज्ञादि तन्निष्टं तद्विषयं विधिं दृष्ट्वा तेबोधं विधेयं विधिविषयं वदंति के ऽज्ञानत्रारणाः विधिः विषयानभिज्ञाः नचतव श्रोतं ज्ञानं विधिविषयं यस्मात् दृष्टिवलतः विधिव्यापारं विनाज्ञानमात्रात्वं मोक्षेदेसन्वयः ॥ अयंभावः ॥ यद्यपि आत्मेत्येवोपासीत विज्ञायप्रज्ञां कुर्वीत आत्मानमुपासीतेत्यात्मज्ञाने विधिसंबंधोपलब्धेर्विधिपर्यालोचनेन शमादिसाधनसंपन्नो भूत्वा मोक्षकामो वेदांतशब्देनात्मज्ञानं कुर्यादितिवाक्यार्थावगमात् ब्रह्मज्ञाने विधेयं इत्थं च मोक्षो विधीयमानज्ञानादेवेति वक्तुं शक्यं तथापि ज्ञानं विधेयं तत्र विधेरशक्यत्वात् आनर्थक्याच्च तथाहि ज्ञानविषये ऽवगते वा ज्ञानविधिरभ्युपगम्यते न ता वदवगते विधेः प्रागे

विधिं दृष्ट्वा नानाविधफलकनिष्टं स्फुटतरं विधेयं तेबोधं त्वमिदधतिचाज्ञानत्रारणाः ॥
नचश्रौतीवुद्धिस्त्वविधिविधेयेति निपुणावदंति त्वं यस्माद मृतपददा दृष्टिवलतः ॥४४॥

वज्ञानस्य सिद्धत्वात् नाप्यनवगते विषयानवगमे तद्विषयज्ञानस्याप्यनवगमात् विषयाधीननिरूपणत्वाच्च ज्ञानस्य नच परोक्षरूपेणावगते विषये ऽपरोक्षज्ञानं विधीयत इति वाच्यं अपरोक्षज्ञाने हेतुनिरूपणात् ब्रह्मणो मानांतरायोग्यत्वात् शब्दस्य तु परोक्षज्ञानमात्रसामर्थ्यात् यदि शब्दादेव प्रथमतः परोक्षं श्रवणादिसहकारेण पश्चाद परोक्षमित्युच्यते तर्हि श्रवणादिक एव विधिरंगीक्रियतां किं ज्ञानेन तत्कल्पनेन नच नियोगमंतरेण वैदिकसाध्यसाधनभावस्यासंभवान्नियोगस्यैव वेदार्थत्वाद्विधिरिति शंक्यं नियोगानिर्वचनेन तस्याप्यनभ्युपगमादित्यधिकमाकरे ॥ इति ज्ञानविधिनिराकरणम् ॥४४॥

विभूतिरिति॥ भोजन्हुतनये शांतमनसो नित्यंविषयविमुखाः श्रवणाधिकारिणो जीवाः इदमशेषंजगत्जगतीपतिरीश्वरश्चेतितवविभूतिः एवंश्रुति
वचनैः श्रुत्वा सतर्कैर्मत्वाचिदानंदं ध्यात्वाबुध्वाऽमृतजुषो भवंतीत्यन्वयः॥ अयंभावः॥ यद्यप्यात्मावा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदि
ध्यासितव्य इति श्रुत्या श्रवणादीनांत्रयाणामपि ज्ञानसाधनत्वमवगम्यते तत्र श्रवणंशाब्दशक्तितात्पर्यविचारः मननंयुक्त्या संभावितत्वा
नुसंधानं निदिध्यासनमेकतानत्वं तेषु निदिध्यासनंप्रधानं तथा सति श्रवणमननयोस्तत्स्वरूपोपकारद्वारा दृष्टद्वारेणांगत्वमुपपद्यते
श्रवणप्राधान्ये तु मनननिदिध्यासनयोः श्रवणपराधीनतया स्वरूपोपकारासंभवाददृष्टद्वारेणांगत्वमभ्युपेयं तच्चायुक्तं दृष्टद्वारेणासंभ

विभूतिस्ते जीवा जगदिदमशेषं च जगतीपतिश्चैवं नित्यं विषयविमुखाः शांतमनसः॥
चिदानंदं श्रुत्वा श्रुतिवचनजातैश्च सुनयैस्तथा मत्वा ध्यात्वाऽमृतपदजुषो जन्हुतनये ४५

वे संभवस्य दृष्टद्वारकत्वस्यान्याय्यत्वादिति वक्तुं शक्यं तथापि तत्त्वोपनिषदं पुरुषं पृच्छामि वेदांतविज्ञानसुनिश्चितार्था इति श्रुत्या शाब्दस्यैवा
परोक्षधीहेतुत्वावगमाच्छाब्दे शेषणतया श्रवणस्यापि शाब्दप्रमाणएवांतर्भावेन तथात्वाच्छ्रवणमेव प्रधानं मनननिदिध्यासने तु तस्यैव फ
लप्रतिबंधविगमलक्षण दृष्टद्वारेणांगतामश्नुवाते न हि प्रतिबंधविगममंतरेणानुभवपर्यंतज्ञानहेतुत्वं संभवति तस्माद् दृष्टद्वारेणोपका
रकत्वान्नादृष्टद्वारकल्पनाप्रसंग गौधोपीत्यधिकमन्यत्र वेदस्कतस्तत्र याणामपि श्रवणादीनां शाब्दप्रमाणप्रतिबंधप्रमाणाप्रामाण्यशंकाः सं
भावनाविपरीतभावनालक्षणप्रतिबंधनिवृत्तिहेतुत्वाविशेषाद् यादिवत्तुल्यसाधनत्वमेव॥ इति श्रवणादिसाधननिरूपणम् ४५

22

प्रवृत्तिमिति॥ भोः श्रीगंगे अमोः प्राणस्य प्रवृत्तिं रुध्वा अदः सकलमपि वाग्यं सुखं विहाय त्वदीयचरणौ उपाश्रित्य वेदांतोदितवचनतः परमह
यं चिदानंदं ब्रह्म ज्ञात्वाऽहं हहइत्याश्चर्ये जीवन्मृतभाग् अहम् अभवम् इत्यन्वयः॥ अयं भावः॥ यद्यपि जीवन्मृतभागित्वसंगतं तेन थाहि जीवनेना
मज्जागरिताद्यवस्थात्रयावच्छेदः मुक्तिः पुनरवस्थात्रयतत्कारणानवच्छेदे सति नित्यनिरतिशयानंदब्रह्माविर्भावः एवं च सति विप्रति
षिद्धमेतज्जीवतो मुक्तिरिति किंचाज्ञाननिवृत्तौ देहेंद्रियादिकमपि निवर्त्तेत कारणनाशे कार्यनाशावश्यंभावात् अज्ञाननिवृत्तौ तु मु
क्तिरिति वदतो व्याघातस्तस्मात् मुक्ताजीवन्मुक्तेर्मुक्तिरिति वक्तुं शक्यं तथापि उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इत्यादि भग

प्रवृत्तिं रुध्वासोः सकलमपि वाग्यं सुखमदो विहाय श्रुत्यंतोदितवचनतो ब्रह्म परमम्॥
चिदानंदं ज्ञात्वा ह्ययमहमुपाश्रित्य चरणौ त्वदीयौ श्रीगंगेऽभवमहह जीवन्मृतभाक्॥ ४६

वद्वाक्यैः साक्षात्कृतब्रह्मभावस्यैव विद्यागुरुत्वकथनात्तदन्यथानुपपत्त्या जीवतो मुक्तिरवश्यमेष्टव्या प्रमाणजनितसाक्षात्कारवत्स
ज्ञानावस्थितस्य योगात् अज्ञाने नष्टे च तत्कार्यभूतोऽयं कार्यकारणसंघातोऽपि नष्ट एव भवति स च नष्टोऽपि दग्धपटवत् किंचित्कालम
वभासते अवभासमानोऽपि दग्धत्वेन वावभासते न सत्त्वेन अतोऽविद्यातत्कार्यदाहात् तन्निमित्तजागरिताद्यवस्थासंबंधोऽपि विदु
षो न भवति तस्मात् सिद्धैव जीवन्मुक्तिरित्यधिकमन्यत्र॥ इति जीवन्मुक्तिनिरूपणप्रकरणम्॥ ४६॥ ॥ ॥

परमिति॥ भो सुरधुनि त्वत्कारुण्यामृतरसकटाक्षैः अधिकृतोऽहं कृती श्रुतिगिरा परं सत्यं सुखघनं ज्ञात्वा देहं त्यक्त्वाऽपरः सन्निहामृतभाक्
भविष्यामीत्यन्वयः॥ अयं भावः॥ यद्यपि स्वरूपसंबंधविशेषरूपायाब्रह्मावाप्तेः स्वतः सिद्धतया फलत्वानुपपत्तेरविद्यानिवृत्तेस्तत्स्व
तद्‌प्यमाणत्वाभावेन पुमर्थत्वाभावादात्यंतिकी दुःखनिवृत्तिर्नित्यसुखसाक्षात्कारो लोकांतरस्थब्रह्मावाप्तिर्वा मुक्तिरिति वक्तुं
युक्तम् तथापि दुःखाभावस्यावेद्यत्वेन पुरुषार्थत्वानुपपत्तेः जनिमत्त्वेनानित्यत्वप्रसक्त्या नित्यसुखसाक्षात्कारस्यापि पुरुषा

परं सत्यं ज्ञात्वा सुखघनमनंतं श्रुतिगिरा परब्रह्मस्थानं सरसमहिमानं सुरधुनि॥४४॥४४॥
त्वदीयैः कारुण्यामृतरसकटाक्षैरधिकृतः कृती देहं त्यक्त्वा परइह भविष्याम्यमृतभाक्॥४७॥

र्थत्वानुपपत्तेः अन्यस्यान्यात्मत्वायोगेन संबंधानिर्वचनेन च देशांतरस्थितब्रह्मावाप्तेरप्यपुरुषार्थत्वात्तत्त्वमस्यादिवाक्यजनितापरोक्ष
ब्रह्मज्ञानेनानाद्यविद्यापटलसमुत्पाटनेन नित्यनिरतिशयानंदप्रत्यगद्वितीयपरमात्मचैतन्यात्मनावस्थानमेवापवर्ग इति न च
त्र मानाभावः न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते ब्रह्मैव सन्ब्रह्माप्यतीत्यादिश्रुतेरेव मानत्वात्॥ ॥ इति विदेहमुक्तिप्रक
रणम्॥४७॥

23

अहमिति॥ भोस्तरधुनि हरादिवर्गस्य अहं बुद्ध्या उपास्या ब्राह्मो लोकः सुलभो भवेत् एतदुपास्तिरूपात्मैव अतस्त्वदीया सेवा ब्रह्मलोकं वितरतीत्यन्वयः॥ अ
यं भावः॥ यद्यप्यहंग्रहोपासकानां स एतान् ब्रह्म गमयतीति श्रूयमाणमुत्तरमार्गप्राप्यं वस्तु परमेव ब्रह्म भवितुं युक्तं ब्रह्मशब्दस्य तत्र मुख्यत्वात् तयोर्ध्वमा
यन्नमृतत्वमेतीत्यमृतत्वकथनाच्च तथापि सत्यलोकाख्यं कार्यमेव ब्रह्मोपासकव्यतिरिक्तत्वात् परिच्छिन्नत्वाच्च गतिपूर्वकं प्राप्तियोग्यं न तु तथा परब्र
ह्मणस्तल्लोकवासिनां तत्त्वज्ञानेऽवश्यंभाविनि सति पुनर्जन्मव्यवधानमन्तरेण मोक्ष्यमाणत्वात् अत एव स्मृतिरपि ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे
॥ परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति इत्थं च सत्यमृतत्वश्रुतिः क्रममुक्त्यभिप्राया तस्मादुत्तरमार्गेण प्राप्यं कार्यमेव ब्रह्मेति सिद्धम्॥ इत्यहं
ग्रहोपासनफलनिरूपणप्रकरणम्॥४८॥ अनात्मनीति भो जह्नुतनये अनात्मनि नामादौ अमरधिषणा या ब्रह्मबुद्ध्या उपास्तिरुक्ता नाम ब्रह्मेत्यु

अहं बुद्ध्योपास्याद् हरमुखवर्गस्य सुलभो भवेद्ब्राह्मो लोको रहितजनशोकः सुरधुनि। त्वमेवैतद्रूपा भवसि करुणापारजलधिस्त्वदीया
सेवा नस्त्रिदशपतिलोकं वितरति॥४८॥ अनात्मन्याख्याताऽमरधिषणयोपास्तिरपि या तया पुण्यं तस्मात्फलमपि भवत्स्वयं भवती॥
अतोऽहं त्वत्पादाश्रयणमधिकं जह्नुतनये सदा मन्ये नान्यत् किल फलविशेषाय विभवः॥४९॥ ॥ ॥ ॥

पासेत्यादिना एवं नामलग्रामादावपि विष्णुबुद्ध्या न या यत् पुण्यं तस्मात् यत्फलं च तद्रूपात्मैव अतोऽहं त्वत्पादाश्रयणमेवाधिकं मन्ये यतोऽन्ये यज्ञादयः फल
विशेषाय विभवः समर्था न भवन्तीत्यन्वयः अयं भावः॥ यद्यपि प्रतीकोपासनस्य न पुण्यमात्रफलं किंतु स एतान् ब्रह्म गमयतीति श्रुतेः सामानवः पुरुष एता
न् उपासकान् ब्रह्मसत्यलोकं गमयति प्रापयतीत्यविशेषेण ब्रह्मोपासकवत्प्रतीकोपासनामप्यमानवपुरुषेण ब्रह्मलोकनयनश्रवणाद् ब्रह्मलोकावाप्तिरपी
ति वक्तुं शक्यं तथापि प्रतीकोपासकानां न सा वक्तुं शक्यात् यथा यथोपासते तेन देवतेभवन्तीति श्रुतेः ब्रह्मभावनारूपक्रतोरेव ब्रह्मलोकप्राप्तिहेतुत्वावगमा
त् नहि प्रतीकोपासकानां ब्रह्मक्रतुरस्ति येन ते ब्रह्म गच्छेयुः किंतु तेषां यथाप्रतीकमर्वाचीनानि फलानि यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवतीत्याद्यु
क्तान्येव तिपञ्चाग्निविदां तु वचनबलादेवेत्यधिकमाकरे॥ इति प्रतीकोपासनफलनिरूपणम्॥४९॥

सतामिति॥ भोजन्हुतनये सतां संगः श्रद्धा विषयवैराग्यं सद्भक्तिमुखं श्रवणमननिदिध्यासनज्ञानानि प्रतिपदं परानंदास्वादः प्रेम विद्यमाने तस्मिन् निरपितन्नि
श्चापि चरमजनने पुरुषेऽपि तव संसाध्या प्रेमपराकाष्ठालक्षणा तव भक्तिर्मुक्तेः करणमित्यन्वयः अयं भावः॥ यद्यपि विरोधिविषयतया स्वज्ञानस्येव स्वाविद्याच्छे
दकत्वाद्वागस्य चातथात्वेन निष्फलत्वाङ्केश्वरागरूपत्वान्नोपादेया भक्तिरिति वक्तुं शक्यं तथापि यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां
ब्रह्मसंस्थोऽमृतत्वमेतीत्यादिश्रुत्या पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्ययेत्यादि भगवद्वाक्येभ्यश्च भक्तेरमृतफलत्वकथनाद्विरोधिविषयतया स्वाविद्यो
च्छेदाक्षमत्वेपि प्रमाणमूलाद्दिन्यायेन तदुच्छेदकत्वसंभवात् ब्रह्मावाप्तिरूपसुखाविर्भावे च तस्या एव हेतुत्वादुपादेयैव भक्तिः परंतु प्रथमं महतां सेवा तद्दयापा
त्रतातः श्रद्धा तत्र बाधर्मेषु ततो हरिगुणश्रुतिः ततो रत्यंकुरोत्पत्तिः स्वरूपाधिगमस्ततः॥ प्रेमवृद्धिः परानंदे तस्याथ स्फुरणं ततः॥ भगवद्धर्मनिष्ठातः स्वस्मिं

सतां संगः श्रद्धा विषयविरतिः सद्भक्तिमुखं परानंदास्वादः प्रतिपदमथो तत्स्थिरपि॥ तवैतत्संसाध्या चरमजनने जन्हुतनये भवे
न्न भक्तिर्मुक्तेः करणमिह मान्यत्कथमपि॥ ५०॥ कृपासिद्धः श्रेष्ठो भवति किल सिद्धेषु करणैरहं सर्वैः शून्योस्म्यहह खलु संसा
धनगणैः॥ कुमेवैकोद्धारे मम तु करणं तेहि विमृशान् हठश्रेष्ठे गंगे चरणमुपपातोस्मि शरणम्॥ ५१॥ ॥ ॥ ॥

स्तद्गुणशालिना॥ ततः प्रेम्णः पराकाष्ठेत्येवं भक्तिगमूमितः॥ व्रातो कैवल्यहेतु किं वा प्रमर्थोमतं तरद्रत्यधिकमस्मत्कृतभगवद्भक्तिचंद्रिकोल्लासे॥ ५०॥
॥ इति भक्तितएव फलनिरूपणं॥ कृपासिद्ध इति॥ भो गंगे करणैः साधनैः जन्मौषधिमंत्रतपः समाधिभिः सिद्धेषु कृपासिद्ध एव श्रेष्ठो ऽहं च सर्वैः साधनैः शून्यः परं
तु मम उद्धारे त्वत्कृपैवैका करणमिति विचारयन् हठश्रेष्ठत्वच्चरणशरणमुपयातोस्मि तस्मात्त्वयाऽहमनुकम्प्य एवेति भावः॥ अयमत्र निष्कर्षः॥ मत्प्रसादादवाप्नोति शा
श्वतं पदमव्ययमित्यादिभगवद्वाक्यात्सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः॥ व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे॥ तेनाधीतश्रुतिगणा नो
पासितमहत्तमाः॥ अव्रतानतप्ततपसो मत्संगान्मामुपागताः इत्यादिना सुग्रीवादीनां तथोपलंभाच्च साधनसंपदभावेपि भगवत्प्रसादतो ज्ञानद्वारा कैवल्यं स्यात् ज्ञा
नं प्रति श्रवणादिसाधनभगवद्भजनभगवत्कृपादीनां विकल्पेन कारणत्वावधारणाद्वित्यधिकमस्मत्कृतभगवद्भक्तिचंद्रिकायाम्॥ इति कृपात एव फले

जनानामिति॥ भो सुरधुनि जनानां तव कृपातो मोक्षो भवतीमां प्रतीतिं प्राप्याहं क्लेशकरणं यागादि तपश्च तथा कष्टसाध्यं ज्ञानं च विमुच्य भवती स्तोत्रनिरतस्त्व
त्तटनिवासी भवामीत्यन्वयः॥ गंगां सेवन्ति ये सम्यक्‌ तेन तिस्त्राति भक्त्या पिबेज्जलं॥ अप्तंगं ज्ञानममलं योगं मोक्षं च विंदति॥ स्नाति कीर्तिता पापं हरत्या भद्रं श्रय
क्षति॥ अवगाहाच्च पीता च पुनात्यासप्तमं कुलं॥ यत्र गंगा महाराज स देशस्तत्तपोवनं॥ सिद्धक्षेत्रं च तज्ज्ञेयं गंगातीरसमाश्रितम्॥ तत्र त्यजति यः प्राणान्‌ ब्रह्म
लोके महीयते॥ गंगामेव निषेवेत प्रयागे तु विशेषतः॥ नान्यत्कलियुगोद्भूतमलं हन्तुं सुदुष्कृतमित्यादिवचनैर्गंगासेविनां सति पापे पिकृतार्थता श्रे

जनानां मोक्षस्ते सुरधुनि कृपातो भवति हि प्रतीतिं प्राप्येमां तव तटनिवासी त्वयि रतः॥ विमुच्याहं यागादिकमथ तपः क्लेशकरणं तथा कृच्छ्रं
ज्ञानं जननि भवती स्तोत्रनिरतः॥ ५२॥ श्रीमच्छंकरभाष्यसिंधुमिलिता गंगा स्तवाख्या शुचिः सद्यः सल्लहरी तदीयमननस्नानादिभाजो नराः॥
सच्चिद्ब्रह्मसमाप्नुवंति नितरां मुक्ता अविद्यादिभिः श्रद्धाभक्तिसमन्विता अविरतं मात्सर्यमानोज्झिताः॥ ५३॥ नत्वा श्रीपुरुषोत्तमाख्यच
रणौ दामोदरस्वामिनां तो गोविंदरूपानिधेश्च चरणौ श्रीरामपूर्वस्य च॥ तो विद्याप्रदवासुदेवयतिनां नारायणाख्योद्धृता सद्गंगालहरी स्व
संगवशतोऽवर्तत नो त्वत्र श्रमः॥ ५४॥ ॥ इति नारायणतीर्थस्वामिविरचिता गंगालहरी समाप्ता॥ श्री शंवत्‌ १९३५ फाल्गुने शुक्ले त्रे॰ १३

वणा सुरुषार्थार्थिभिर्गंगैव सव्येति भावः॥ इति गंगामहात्म्यं॥ ५२॥ श्रीमच्छंकरेति॰ श्रीमच्छंकरभाष्यसमुद्रमिलिता गंगा स्तोत्राख्या पवित्रा उन्माद
यल्लहरी तदीयमननस्नानाख्यभाजो नरा अविरतं मात्सर्यमानोज्झिताः श्रद्धाभक्तिसमन्विताः सच्चिद्ब्रह्म प्राप्नुवंतीत्यन्वयः॥ ५३॥ परमेति गुरुक्रमेण
स्वगुरुपरंपरां दर्शयन्नतितति फलमाह नत्वेति॰ नारायणतीर्थस्य आस्यात्मुखात्‌ उद्धृता अर्थवीसद्गंगास्तुतिरूपा स्वसंगवशात्‌ अत्र लोके श्राक
ल्पाणं तनोत्वित्यन्वयः॥ ५४॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीनारायणतीर्थस्वामिविरचिता गंगालहरी व्याख्या समाप्ता॥ ॥